भाद्रपदाश्विनौ
वर्षम् –६८
एकादशोऽङ्कः
विक्रमाब्दः २०७४
युगाब्दः ५११९
५ सितम्बर २०१७

ISSN 2249-698X

# भारती

## संस्कृत-मासपत्रिका

एकस्याः प्रतेः
१५/–
वार्षिक–शुल्कम्
१२०/–
आजीवनसदस्यता
१५००/–



## विषय-सूची


| क्र.सं. | विषयाः | निबन्धकाराः | पृष्ठ-संख्या |
|---|---|---|---|
| १ | मङ्गलाचरणम् | श्री प्यारेमोहनशर्मा | ३ |
| २ | मासावतरणम् | श्री प्यारेमोहनशर्मा | ३ |
| ३ | सम्पादकीयम् | श्री प्यारेमोहनशर्मा | ४ |
| ४ | समाजस्य स्त्रीविषयकं चिन्तनम् | श्री प्यारेमोहनशर्मा | ५ |
| ५ | मुरारिबापुसूत्राणि | हर्षदेवमाधवः | ७ |
| ६ | सूक्ति-सुधा | डॉ. प्रेमचन्द्र रांवका | ८ |
| ७ | गड्डलिकाप्रवाहः | डॉ. सत्यव्रत वर्मा | ९ |
| ८ | स्वागत-गीतम् | डॉ. राजेन्द्रप्रसाद भट्टः | ११ |
| ९ | महर्षिदयानन्दस्य षड्दर्शनसमन्वयः | डॉ. गीता शुक्ला | १२ |
| १० | विधेः व्यवस्था भवतीदृशी | डॉ. राकेश शास्त्री | १३ |
| ११ | पुस्तकसमीक्षा | म.म. देवर्षिकलानाथशास्त्री | १४ |
| १२ | आङ्ग्लभाषायां संस्कृतसमीक्षणम् | डॉ. शिवदत्तशर्मा चतुर्वेदी | १५ |
| १३ | श्रीमतां बाबासाहेबआप्टेमहोदयानां व्यक्तित्ववर्णने- | वेणीमाधव गो. धर्माधिकारी | १६ |
| १४ | प्रेरकप्रसङ्गशतकम् | श्रीमती आराधना धर्माधिकारी | १७ |
| १५ | साहित्यदर्पणस्य काश्चन टीकाः | डॉ. कृष्णकुमार कुमावत | १८ |
| १६ | वैदिकसंविधानं विधिश्च | कैलाशचन्द्र बुनकर | १९ |
| १७ | गीत-संस्कृतम् | बद्रीप्रसाद शर्मा | २० |
| १८ | चिकित्सायां वैदिकमन्त्रप्रयोगस्य औचित्यम् | प्रवीणकुमार शर्मा | २१ |
| १९ | वैद्यशंकरलालशर्मणः साहित्यिककृतीनां .... | आचार्यः दीपकशर्मा | २४ |
| २० | संस्कृतसमाचारः | रामानुजपांडेय | २८ |
| २२ | नारी-स्तम्भः | डॉ. राजेश्वरी भट्टः | ३० |
| २३ | आयुर्वेद स्तम्भः | प्रो. बनवारीलालगौडः | ३२ |


### पाठकेभ्यो निवेदनम्

संस्कृतसुधियः पाठकाः निवेद्यन्ते यद् भारत्यां प्रकाशिताः शोधलेखाः, सामयिकनिबन्धाः, कविताः, कथाः, विनोदवार्ताः, लघुनाट्यकृत्यादयो भवद्भ्यः कथं रोचन्ते ? स्वविचारयुक्तपत्राणि निम्नलिखितसङ्केतोपरि संप्रेष्यानुगृह्णन्तु- **सम्पादक, 'भारती' संस्कृतमासिक, भारतीभवन, बी-15, न्यू कॉलोनी, जयपुर-302001**

**दूरभाषः 0141-2379014, मो. 9783105699**

**(धनादेश/चैक/ड्राफ्ट केवल ''भारती'' के नाम से ही भेजें- प्रबन्ध सम्पादक)**



।। श्रीशः ।।

ISSN2249-698X

# भारती

संस्कृत-मासपत्रिका



**प्रमुखसंरक्षकाः**
जगद्गुरवो निम्बार्कपीठाचार्याः स्व. श्रीराधासर्वेश्वरशरणदेवाचार्याः

**प्रमुखसंरक्षकाः**
जगद्गुरुशङ्कराचार्यस्वामिश्रीजयेन्द्रसरस्वतीमहाभागाः

**प्रेरणास्रोतः**
स्व. परमाचार्यः
श्रीचन्द्रशेखरेन्द्रसरस्वतीमहाभागः

संस्थापकौ
स्व. उमाकान्तकेशवआप्टे
( बाबा साहब आप्टे )
स्व. श्रीगिरिराजशास्त्री ( दादाभाई )

संरक्षकाः
स्वामी विश्वेशतीर्थः
स्वामी सत्यमित्रानन्दगिरिः
स्वामी रामभद्राचार्यः
आचार्यः अविचलदासः
स्वामी विद्यानन्दसरस्वती

प्रधानसम्पादकः
देवर्षिकलानाथशास्त्री

सम्पादकः
प्यारेमोहनशर्मा

प्रबन्धसम्पादकः
सुदामा शर्मा

सहसम्पादकौ
प्रो. सुरेन्द्रकुमारशर्मा
शिवशरणनाथत्रिपाठी

आर्थिकपरामर्शदाता
ओ.पी. गोयलः

पृष्ठसंयोजनम्
श्याम प्रिन्टर्स, 22 गोदाम, जयपुरम्
rajeshksharma69@gmail.com - 01414001974


## मङ्गलाचरणम्

मासे आश्वयुजे सदैव सुधियो दुर्गां जगन्मातरम्,
संसारार्णवतारिणीं सुललितामर्चन्ति निःश्रेयसे।
सर्वं चापि चराचरं जगदिदं यत्तेजसा भासते,
सा चण्डी नवमूर्तिभिर्द्युतिमती पायादजस्रं जगत्।।

## मासावतरणम्

कन्याराशिगते रवौ पितृगणानावाहन्त्यात्मजाः,
शास्त्रोक्तेन विधानकेन सुधियः कुर्वन्ति श्राद्धं सुताः।
नानाव्यञ्जनराशिभिः सुमधुरैः सन्तर्पयन्त्यग्रजान्,
दत्त्वा यान्ति शुभाशयांश्च पितरो मासेऽसिते ह्याश्विने।।


कार्यालयः
बी-15, भारतीभवनम्
न्यू कॉलोनी, जयपुरम् ( राज. )
ई-मेल sanskritbharti09@gmail.com

भाद्रपदाश्विनौ
वर्षम् 68
वार्षिकशुल्कम् 120/-

विक्रमाब्दः 2074
सितम्बर, 2017
अङ्कः - 11
पञ्चवार्षिकशुल्कम् 500/-
आजीवनसदस्यताशुल्कम् 1500/- रूप्यकाणि

सम्पादकीयम्

# अमितशावर्यस्य जयपुरयात्रा

...✍ पं. प्यारेमोहनशर्मा

भारतीयजनतादलस्य राष्ट्रीयोऽध्यक्षः अमितशाहोऽवदत् यत् आगामिनि काले भारतीयं जनतादलं राजस्थानेऽजेयं भविष्यति। स अवदत् केन्द्रे नरेन्द्रमोदी राजस्थाने च वसुन्धराराजे उभौ मिलित्वा राष्ट्राय (ग्रोथ इञ्जन) कार्यं कुरुतः। शाहोऽवदत् यत् भारतीयं जनतादलं। (2014 ई.) चतुर्दशाधिकद्विसहस्र-तमे ख्रिष्टाब्देऽपि विजयश्रियमलभत अधुनापि विजयश्रियं प्राप्स्यति। विधानसभा-निर्वाचन-कालात् पूर्वमेव चतुर्षु मासेषु राजस्थानप्रान्ते भारतीयं जनतादलमजेयां स्थितिं लप्स्यते। प्रदेशे भाजपादलं संघटनं द्रढ़यितुं कार्याणि विधास्यति। पत्रकारैः सह वार्तां कुर्वन्नसावभाषत यत् प्रदेशे सर्वकारः श्रेष्ठं कार्यं विदधाति। नेतृत्वपिरवर्तनकार्यं तु केन्द्रसर्वकारो विदधाति।

स अवदत् यत् प्रदेशस्य कृषकानां ऋणमुक्तिविषये तु राज्यसर्वकार एव निर्णेष्यति। केन्द्रीयो वित्तमन्त्री अरुणजेटली स्पष्टमवदत् यत् ऋणमुक्तिविषये राज्यसर्वकारा एव स्वतन्त्ररूपेण निर्णयं विधास्यन्ति। गोवधविषये अमितशाहोऽकथयत् भाजपाशासितप्रदेशेषु विषयेऽस्मिन् नियमो विरचितो विद्यते। राष्ट्रीयाध्यक्षोऽव दत् यत् केन्द्रसर्वकारः 106 योजनाभिः देशस्य निर्धनानां दलितानां च जीवनस्तरं समुन्नेतुं विकासकार्यमकरोत्। असाऽववदत् यत् प्रधानमन्त्री नरेन्द्रमोदी सर्वाधिकलोकप्रियो नेता वर्तते। राष्ट्रस्य षष्टिप्रतिशतं भूभागे पञ्च-पञ्चाशत्प्रतिशतं जनसंख्योपरि भारतीयजनतादलस्य शासनं वर्तते। दलं द्रढयितुं चतुर्लक्षसंख्याकाः विस्तारकाः कार्यं कुर्वन्ति। केन्द्रे निष्पक्षः पारदर्शी निर्णायकः सर्वकारः कार्यं विदधाति। अत एव मुद्रानिरोधः (नोटबन्दी) जीएसटी सदृशा ऐतिहासिकाः निर्णयाः संजाताः साफल्येन च स्वोद्देश्यं पूरयन्ति। राममन्दिरनिर्माणविषये अवदत् सर्वेषां सहमत्या कार्यमिदं भविष्यति। दलितगृहे भोजनविषये शाहोऽवदत् एष प्रसङ्गो राजनीतिसम्बद्धो न विद्यते। विकासकार्येषु यूपीए कार्यकाले त्रयोदशतमे वित्त-आयोगे केन्द्रीयकरे राजस्थानस्य भागे 84424 कोटिरूप्यकाण्यासन्। मोदीसर्वकारश्चतुर्दशे वित्त-आयोगे 218145 कोटिरूप्य-काणि अकरोत्। अर्थात् त्रिगुणोऽधिकः।

जीएसटी विषये चर्चायामवदत् यत् एतेन एकदेशे एकः करः इति स्वप्नं साकारोऽभवत्। सर्वेषां विरोधिजनानां धारणा ध्वस्ता जाता। व्यापकस्तरे जनता जीएसटी करं स्वीचकार। असाववदत् देशस्य सुरक्षायै दृढ़राजनैतिकेच्छाशक्तियुक्तः सर्वकारः एव सुदृढं निर्णय विधातुं शक्नोति। मोदीसर्वकारः सर्जिकलस्ट्राइक-माध्यमेन कार्यमिदं विश्वसंमुखे प्रास्तौत्। राजस्थान-सर्वकारेण, महिलावित्तसशक्तिकरणाय प्रारब्धां भामाशाहयोजनां, मुख्यमन्त्रिजलस्वावलम्बनयोजनां न्यायोभवतांद्वारे अन्नपूर्णा भण्डारणयोजनां पंडित-दीनदयालउपाध्यायजनकल्याणयोजना शिविरभिधां योजनां वर्णयन् राजस्थानस्य निर्धनानग्रेसरान् विधातुं विहितकार्येभ्यः राजस्थानसर्वकारस्य प्रशंसामकरोत्।

भारतीयजनतादलस्य राष्ट्रीयोऽध्यक्षः अमितशाहो जुलाईमासस्य द्वाविंशतितमे दिनाङ्के शकुनहोटले साधुसंतजनेभ्यो विशिष्टजनेभ्यश्चाशीर्वादमगृह्णात्। अस्मिन् कार्यक्रमे मुख्यमन्त्रीवसुन्धरा राजेमहोदया प्रदेशाध्यक्ष, परनामी महोदयोऽपि समुपस्थितोऽभवत्। श्रद्धेयसंतजन-विशिष्टजनसम्पर्कसंवादकार्यक्रमे शाहो राजे च संतजनानां विशिष्टजनानां चाभिनन्दनमकुरुताम्। सर्वेभ्य आशीर्वाद-मलभताम्। ततश्च अमितशाहोऽवदत् भाजपासर्वकारः सांस्कृतिकं राष्ट्रवादं सुदृढमकरोत्। मुख्यमन्त्री वसुन्धराराजे महोदयावदत् यत् अस्माकं सततं महात्मभिः संतजनैश्च आशीर्वादः प्रेरणा च मिलति। राज्यसर्वकारः प्रदेशस्य मन्दिराणां धार्मिकस्थलानां च विकासं सौन्दर्यकरणादिकं महत्वपूर्णकार्यमकरोत् कार्यक्रमे संस्कृतमासपत्रिकायाः ''भारत्याः'' सम्पादकः पं. प्यारेमोहनशर्मा अमितशाहाय भारतीमुपाहरत् वसुन्धराराजेमहोदयाभ्यः भारती परिचयं च प्रायच्छत्।

# समाजस्य स्त्रीविषयकं चिन्तनम्

❑ पं. प्यारेमोहनशर्मा

यस्मिन् समाजे ''यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवता:'' इत्यासीत् चिन्तनं तस्मिन्नेव समाजे सम्प्रति स्त्रियो गृहसेविका, दास्य:, उपानहतुल्या: संलक्ष्यन्ते। जैसलमेरु-नगरस्यैका घटनात्र प्रस्तूयते-एकस्मिन् परिवारे गृहस्वामिनी अतीव शिष्टा सरला परिश्रमशीला आसीत्। एकदा मदीयपुत्रस्तस्या नाम अपृच्छत्, सा स्वकीयं नाम धापू इति समबोधयत्। इत: पूर्वं मदीय: पुत्र: तत्र नैकाभि: स्त्रीभि: सह वार्तालापे तासां नामानि अपृच्छत् तदा, आचुकी, अन्तिमा, धापी इत्यादीनि नामानि तासां ज्ञातानि। तासां नामभिरेव ज्ञायते यत् अनिच्छापूर्वकं तासां जन्म परिवारेषुअभवत्। नगरेषु स्त्रिय: पुत्रजन्मेच्छया भाग्यवशात् जनिमागतां पुत्रीं जन्मन: किञ्चित् कालानन्तरमेव तत्रैवाप्रेषयन् यस्मात् ता: समागता: अर्थात् यमालये प्रैषयन्। एष: क्रमो नगरेषु सम्प्रत्यपि प्रचलति। केवलं शिक्षितो वर्ग: किञ्चित् सावधानोऽभवत्। अतस्तत्र जनसंख्यानिरोधोऽभवत्। परन्तु ग्रामेष्वद्यापि स्त्री सन्तानोत्पादिका यन्त्ररूपैवास्ति। स्त्रीपुरुषयो: अनुपाते नगरेषु सम्प्रत्यपि विषमा स्थितिरेव। ग्रामेषु अनिच्छा-पूर्वकमपि बालिकानां बाहुल्ये जन्म संभवति।

एकदा धापीमसावपृच्छत् भवत्या नाम कथं धापी जातम्? तदा साअवदत्-अहं सप्तभगिनीभ्य: पश्चात् एकभ्रात्रानन्तरं समु पत्पन्ना जाता। तदा मम पिता मदीयं नाम धापी इत्यघोषयत्। अस्य किं तात्पर्यमिति प्रश्नोत्तरे सावदत् मम पितामही अकथयत् भो धापी वयं तु पुत्रीणां सेनया तृप्ता संजाता (धाप गई)। तदा पुनरसावकथयत् परन्तु भवत्यास्तु द्वौ पुत्रौ एका च पुत्री वर्तते। भवती च तेभ्य: सर्वेभ्य: श्रेष्ठां शिक्षामपि यच्छति। न भवती तत्र कोऽपि भेदभावं करोति। किम् अद्यापि भवत्यै धापूनाम रोचते। सा न किमपिअवदत्। नीचैर्भूमिं पदाङ्गुष्ठेन पस्पर्श। तदा मदीय: पुत्रस्तेषां सर्वेषां सम्मत्या तस्या नाम 'धूप कँवर' इति चकार। सापि पुत्राणामाग्रहेण तन्नाम स्वीचकार प्रसन्ना चाभवत्। तस्या: धूपकंवर इति नाम सर्वकारीयपत्रेषु संशोध्य उपखण्डाधिकारिणा संशोधितं पत्रं तस्यै प्रदत्तम् ततश्च सा अतिप्रसन्ना संजाता।

पाठकेभ्य: सैषा कथा एतदर्थं श्राविता यत् सम्प्रति समाचारपत्रेषु स्त्रीणां शिखाकर्तनं बाहुल्येन चर्चितं विद्यते। आभि: घटनाभि: समाजस्य नग्नं चित्रं सम्मुखे समागतम्। वस्तुत: अंधविश्वासै: अद्यापि अस्माकं समाजो निगडितो विद्यते। एतादृशीं मिथ्या-परिकल्पनां केवलं केचन धूर्ता: कुर्वन्ति ततश्च सर्वत्र प्रसारयन्ति। अन्ते च गुरव: समाधनं विधास्यन्ति ते सर्वमनिष्टं दूरं करिष्यन्तीति समाचारा: सर्वत्र समाचारपत्रमाध्यमेन विज्ञापनेन च प्रसारयन्ति। अन्ध-विश्वासग्रस्ता: स्त्रिय: गुरुभ्यो दक्षिणां दत्वा समागतमनिष्टं शमयितुं प्रयतन्ते। गुरवस्तु विपुलां दक्षिणां लब्ध्वा सानन्दं जीवनं जीवन्ति ताभि: सह रमन्ते च।

स्त्रीणामेतादृशानि नामानि एतादृशी दशा च अद्यापि तथैव संलक्ष्यते ता: परिवारे उपेक्षिता: केवलं सेविका इति संवदन्ति। किमधिकं ग्रामीणसमाजे अद्यापि एतादृश्यो महिला विद्यन्ते याभि: स्वीयं नाम एव न श्रुतम्। गृहपरिवारे समाजे च स्त्रिय: कस्यापि पत्नी, माता, भगिनी, पुत्री प्रभृतिभिरेव नामभि: सम्बोध्यन्ते। अर्थात् एषा रामस्य भार्या विद्यते, एषा महेशस्य पुत्री अस्ति एषा उमेशस्य माता विद्यते, एषा रमेशस्य पितामही विद्यते-इत्यादिना एव स्त्रियं जानन्ति सामाजिका तासां नामानि न कोऽपि जानाति। इतोऽपि अधिकं समाजे काचन स्त्री चुडेल, काचन डाकन, जादूगरनी अथवा भिक्षुणी अथवा केशशूलिनी इत्यादि रूपेण तासामनादर: समाजेऽद्यापि संलक्ष्यते। एताषां वास्तविकानि नामानि नहि समाजो जानाति न च जिज्ञासते।

वस्तुतो नाम्नैव सर्वाणि कार्याणि जायन्ते। वैधानिकी स्वीकृतिरपि नाम्नैव मिलति। परन्तु नामविहीनाया: स्त्रिय: सम्पत्तावपि अधिकारो न भवति। करचौर्यं विधातुं धनिका: सम्पत्तिक्रये विक्रये च तासां नामान्युपयुञ्जन्ते। परन्तु न ता:

जानन्ति यत्तासां गृहस्वामिभिः तासां नाम्ना कियन्ति भवनानि, क्षेत्राणि, क्रीतानि विक्रीतानि च। यदि ताः सर्वं दृष्ट्वा मौनं धारयन्ति तदा तु सर्वं श्रेष्ठं परन्तु मुखेन किमपि भणन्ति तदा न पुरुषाः सहन्ते।

वस्तुतस्तु नाम्नैव सर्वं दर्शनं संस्कृतिश्च परिचीयते। वयोऽनुसारेण मुखाकृतिः परिवर्तते। वाणी अपि स्खलिता जायते। तदापि केवलं नाम एव जनं परिचाययति।

अधुना कार्यं विलोकयतु। पुरुषाणामपेक्षया स्त्रियः त्रिगुणं कार्यं कुर्वन्ति। नागरिकाः भृत्यकार्यरताः शिक्षिताः स्त्रियोऽपि कार्यभारेण निगडिताः संलक्ष्यन्ते। नागरिका स्त्रियापेक्षा ग्रामीणस्त्रियः कठिनं शारीरिकं श्रमं कुर्वन्ति। क्षेत्रेषु श्रमेण, इन्धनानयनेन, दूरतो जलमानयनेन सुदूरं पदातिगमनेन च ग्रामीणाः स्त्रियः प्रत्यहं कठोरं श्रमं कुर्वन्ति। विवशास्ताः पतिभ्यः पुत्रेभ्यश्च नैवाशां कुर्वन्ति इमाः। अत्यधिककार्येण श्रान्तास्ताः शरीरेण मस्तिष्केन च दुर्बला जायन्ते। तथापि परिजनाः दुर्भाषन्ते शराबनामकं द्रव्यं पीत्वा मत्ता नां पुरुषा णां पादाघातं सहन्तेता।

ग्रामीणक्षेत्रेष्वेव न अपितु नगरेष्वपि पुरुषा रसवत्यां गृहस्वच्छतां अन्यानि गृहकार्याणि च न कुर्वन्ति। एतत्करणं ते स्वकीयमपमानमेव जानन्ति। एकः पुरुषः कदाचित् स्वमित्रं पत्न्या सहितं स्वगृहमामन्त्रयत् समये तावागतौ। पुरुषः मित्रायाकथयत् यदद्यआवां भोजनं रचयिष्यावः। एते द्वेऽद्य सानन्दं वार्तालापं विनोदं च करिष्यतः। सहसा तदीया पत्नी अवदत् यदेते तु गृहे जलपात्रमपि स्वयं न गृह्णन्ति। अन्य एव जलपात्रं प्रयच्छति तदा जलं पिबन्ति। एते न किमपि जानन्ति। अहमेव सर्वं गृहकार्यं वणिक्पथाच्च सर्वाणि वस्तूनि आनयामि। इमे केवलं दूरदर्शनं विलोकयन्ति। सर्वं गृहकार्यं समाप्य यदि स्त्री प्रकृतिप्रदत्तं सौन्दर्यं शृङ्गारादिना सम्यक् विधातुं सौन्दर्यसाधनानि आनयति तदा गृहक्लेशः संवर्धते। लम्पटाः पुरुषाः परकीयां सौन्दर्यसाधनैः सुसज्जितां दिदृक्षन्ते न तु स्वकीयाम्। स्त्रियो जन्मना आरभ्य मृत्युपर्यन्तं समाजस्य पुरुषस्य च क्रौर्यं सहन्ते।

सर्वं प्राक्तनमुचितमनुचितं वा विस्मृतिगर्ते पतितं जायते। परन्तु महिलाविमर्शे तस्या अस्मितायाः प्रश्नस्तु शाश्वतं जीविष्यति। अधुना एतदेव श्रेष्ठं भविष्यति यत् समाजः स्वयमग्रणी भूत्वा स्त्रीणां सम्मानस्य समतायाः सुरक्षायाश्च प्रतिमानानि निर्मापयेत्। मातरो यदि पतिसदृशाः पुत्रा न भवेयुः इत्यभिलषन्ति चेत् अधुनैव स्वपुत्राणाम् आचरणं सावधानतया परिवर्तयेयुः। स्त्रियः न शस्त्राणि गृह्णन्तु परन्तु प्रबलरूपेण प्रतिरोधं कुर्युः। शिक्षिताः स्त्रियः अनेनैवास्त्रेण स्त्रीसम्मानस्य प्रतिमानानि स्थापयेयुः। पुरुषाणां कृते यदि पुत्रीणां सुरक्षायाः मनागपि चिन्ता विद्यते तदा सर्वतः प्रथमं पुत्र्याः मातुः सम्मानं सदैव कुर्युः। गृहकार्येषु रसवत्यां स्वच्छताकर्मणि स्वेन सह स्वपुत्रानपि प्रवेशं प्रयच्छेयुः। कार्यं शिक्षयेयुः परेषां सम्मानकरणस्य शिक्षां दद्युः।

स्त्रियः कुंठाग्रस्ताः न भवेयुः हताशां त्यजेयुः। भयेनाज्ञातकारणेन शिखाकर्तनभयं विहाय स्वतन्त्ररूपेण शालीनतया स्वकेशविन्यासं कुर्युः। अधुना समयः समागतः यन्नगराणीव ग्रामेषु स्त्रीणां सौन्दर्यशैलूनानां व्यवस्था भवेत्। यत्र ग्रामीणाः स्त्रियोऽपि सर्वेषां सम्मुखे गच्छेयुः स्वसौन्दर्यं च संस्थापयेयुः। नवीनभारते ग्रामीणसमुदायोऽपि आधुनिकतां स्वीकुर्यात्। नवीनाः श्रमोपायाः नवीनं ज्ञानं नवीनं (फैशनं) सौन्दर्यं सर्वत्र प्रसृतं भवेत्।

सर्वेषां मध्ये स्थानीयाः ग्रामीणाः नागरिकं प्रशासनं सर्वकारस्य विभिन्नानि संस्थानानि सुदृढतया मिथ्याप्रचारं (अफवाह) विनाशयेयुः। कुचक्रिणं कुमार्गगामिनं च सुदृढं दण्डेन दण्डितं विदध्युः। नवीनोत्सवानां नवीनपरम्पराणां च सन्दर्भे ग्रामीणलोकरंगोत्सवाः सज्जीभवेयुः यत्र सुरक्षायाः सुदृढा व्यवस्था भवेत् स्त्रीणां च सर्वाधिकं प्रामुख्येन भागो भवेत्। वयमपि नवीनमेकं दिनमानायितुं विश्वस्मिन् विश्वे प्रेरणां प्रयच्छेम। तस्य नाम ''पत्नी दिवसो'' भवेत्। यत्र तस्मिन् दिवसे सर्वं गृहकार्यं सम्पूर्णदिनं यावत् पुरुषा एव कुर्युः।

# मुरारिबापुसूत्राणि

❑ डॉ. हर्षदेवमाधवः

**दिनचर्यायाः साफल्यार्थं दशसूत्राणि–**

ईसुख्रिस्तस्य जीवनं सरलं, सरलानि वचनानि, चरित्रमपि सरलम्। तस्य सूत्राणि वेदेष्वेव वर्तन्ते। तस्य दिनचर्यायाः दशसूत्राणि आसन्।

(१) तव मुखं शुचिस्मितेन सुशोभितं भवेत्। प्रसन्ने चित्ते सर्वमपि प्रसन्नं विश्वम्।

(२) विना कारणं न क्रोधः कर्तव्यः। प्रातःकाले उत्थानसमये, भोजनवेलायां, भोजनपर्यवेषणकाले, शयनकाले, गृहाद् बहिर्गमनकाले अथवा प्रतिनिवर्तन–काले इत्थं षड् प्रसङ्गेषु क्रोधत्यागः कर्तव्यः।

(३) स्वलक्ष्यं निश्चित्य तत्प्राप्तुं यत्नः कर्तव्यः। येन लक्ष्यं न निर्धारितं सः अन्यान् निन्दति।

(४) यस्य कस्यापि जनस्य परिचयो भवेत् तदा तस्य साक्षात्कारकाले तस्य रुचिः यस्मिन् विषये वर्तते तद् विषयम् आधारीकृत्य संलापं कुरु। आत्मकेन्द्रितायाः त्यागं कुरु। श्रोता नीरसो न भवेत् तथा व्यहर्तव्यं यथा गोस्वामिनः कथयन्ति–

**'बन्दउ गुरुपद पदुम परागा।**
**सुरुचि सुबास सरस अनुरागा।'**

(५) सर्वान्प्रति मैत्रीभावः स्वीकर्तव्यः यतोहि न कोऽपि शत्रुः भवेत्। त्वं स्वयमेव अजातशत्रुः भविष्यसि। यतः मैत्री भागवतीयं भक्तिस्थानं वर्तते। सखाभावः ईश्वरसान्निध्ये उपयुक्तः। यथाहि रामचरितमानसे परमेश्वरस्य प्रतिज्ञा वर्तते–

**'सखा सोच त्यागहु बल मोरे।**
**सब विधि घटब काज मैं तोरे।।'**

(६) सदैव आशावादिनः सत्यवादिनो भवन्तु। सदैव मनोरथाः सेवन्तां यद् यदि न अद्य तर्हि श्वोऽपि मयि भगवद्भावो जागरितो भविष्यतीति। अध्यात्मजगति आशा शृङ्खलापि वर्तते। किन्तु आशावादिनः सत्यवादिनो भूत्वा भगवद्ध्यानं कुर्युः।

(७) उत्साहशक्तिं बलवत्तरां कुरुत। नैराश्यं न सेवन्ताम्। जीवनं रेलपट्टः नास्ति, यद् निश्चितमार्गेण एव गच्छेत्। जीवनं जलधारासदृशं वर्तते। अन्यान् सोत्साहान् दृष्ट्वा तान् निरुत्साहान् न कुरुत, न तेभ्यः ईर्ष्यत।

(८) अतीतस्य क्षतिषु स्खलनेषु दृष्टिं विधाय अतीतस्खलनेभ्यः बोधं गृहीत्वा भविष्यन्मार्गस्य परिमार्जनं कुरुत। मा रोदनं कुरुत। अतीतक्षतिं विचिन्त्य मृत्युमपि महोत्सवं कुरुत।

(९) व्यक्तित्वस्य विकासः सत्कर्मैः भविष्यति, न शब्दैः। केवलं व्याख्याभिः परिभाषाभिः जीवनस्य निर्माणं न भवति। मनुष्यः सत्कर्मैः स्वात्मानं विकसितं कर्तुं शक्नोति।

(१०) विपत्तिकाले मनो नैराश्याद् रक्षणीयम्। भगवद्गीतापि कथयति, 'संशयात्मा विनश्यतीति।' सत्याः दक्षपुत्र्याः विश्वासो रामस्य परीक्षाकाले दृढो नासीत्। रामचरितमानसे सत्याः आत्मा विश्वासात् चलित आसीत् इति वर्णितम्। अत एव नारदः पार्वतीं तपः कर्तुं कथयति। पार्वती तपसा शिवं क्रीतं दासं करोति।

**साधवो नोग्राः, न सङ्घर्षप्रियाः, किन्तु व्यग्राः –**

ईसुख्रिस्तः कथयति यत् 'नाऽहं शान्त्यर्थं किन्तु सङ्घर्षार्थम् आगतः, अहं पितरं करवालेन व्यस्तं कर्तुं, मातरम् अधोमुखीं कर्तुम् आगतः इति।' सर्वेऽपि शान्तिम् इच्छन्ति। 'सङ्घर्ष' इति शब्दः मह्यमपि न रोचते, किन्तु रामचरितमानसेऽपि 'तरवारि' शब्दस्य प्रयोगो वर्तते। रावणः सीतायै क्रुध्यति तदा स कथयति–

**'सीता तैं मम कृत अपमाना।**
**कटिहऊँ तव सिर कठिन कृपाना।।'**

इस्लामधर्मेऽपि शान्त्यर्थं करवालस्य निर्देशाः वर्तन्ते।

वस्तुतः ईसुख्रिस्तस्य कथनं भवेद् अहम् ईश्वरस्य पुत्रोऽस्मि। नाऽहं शान्तिं वा सुखं वा भोक्तुम् आगतः। अहं तथाकथितानां जनानां नास्तिकतया सह, अधार्मिकतया सह सङ्घर्षं कर्तुमागतः। ईशपुत्रस्य कथनस्य व्यङ्ग्यार्थोऽस्ति यद् अहं पाषाणगुटिका-प्रहारान् सोढुम् आगतः। ईसुख्रिस्तः कथयितुम् इच्छति यद् 'या माता पुत्रीं तर्जयति तां व्यग्रां कर्तुमहमागत इति।' साधुपुरुषा अपि देशकालानुरूपं वदन्ति।

**पवित्रश्रेष्ठानन्दपुष्टिकरं यत्र स्यात्।**

ऋग्वेदे 'इन्द्र' शब्दः परमात्मवाचकः। ऋषिः भगवते इन्द्राय कथयति यद्-

**'इन्द्र श्रेष्ठानि द्रविणानि धेहि चित्तिं दक्षस्य सुभगत्वमस्मे।**
**पोषं रयीणामरिष्टिं तनूनां स्वाद्मानं वाचः सुदिनत्वमह्नाम्।।'**

(ऋ. २-२१-६) ऋषिः कथयति 'हे परमात्मन्! श्रेष्ठानि द्रविणानि नो देहि। द्रव्यं श्रेष्ठं भवेन्न निकृष्टम्। निकृष्टं धनं न लाभदायकं, किन्तु हानिकारकम्। अतः दिव्यं धनं पवित्रं परोपकारार्थं कल्याणकारकं भवति।' 'चित्तिं दक्षस्य' ऋचः अस्य शब्दस्य गर्भितार्थः अस्ति यद्, 'धनवान् दक्षः अर्थात् चतुरो मतिमान् भवेत्।' 'पोषं' अर्थात् पुष्टिदायकम्। धनप्राप्त्यानन्दः परमानन्दो भवेत्, आनन्दः पुष्टो जायेत। वाचि माधुर्यं देहि- 'हे परमात्मन्! प्रतिदिनं शुभदिनं भवेत्।' ईसुख्रिस्तः अपि बालकाय कथयति यत् 'त्वं जीवने निश्चिन्तः भव।' वेदवाक्येऽपि 'चित्तिं दक्षस्य' अर्थात् चैतन्यस्य, चित्तस्य स्थैर्यमेवा-भिप्रेतम्। ईसुख्रिस्तः कथयति यत् 'सदैव शुभं चिन्तनीयं, शत्रुभ्योऽपि शुभं चिन्तनीयम्। यदि त्वं शत्रौ प्रणयं न करोषि तदा त्वम् अपि शत्रुवद् व्यवहरसि। प्रणयः एव स्पर्शमणिरस्ति लाहें काञ्चने परिवर्तयितुम्।'

८, राजतिलक बंगलोज़, आबादनगर,
बोपल, अहमदाबाद।

# सूक्ति-सुधा

अनुवादकः
❑ **डॉ. प्रेमचन्द्र रांवका**, पूर्व-आचार्यः

**( 15 वीं श. आचार्य सकलकीर्तिरचितसुभाषितरत्नावलीतः )**

**पापं शत्रुं परं विद्धि, श्वभ्रतिर्यग्गतिप्रदम्।**
**रोगक्लेशादिभण्डारं सर्वदुःखाकरं नृणाम्।।**

मनुष्यों के लिये नरक और तिर्यंच गति को देने वाला, रोग और क्लेश आदि का भण्डार, समस्त दुःखों की खान-पाप को बड़ा शत्रु जानो।

**जीवन्तोऽपि मृता ज्ञेया धर्महीना हि मानवाः।**
**मृतो धर्मेण संयुक्तो इहामुत्र च जीवितः।।**

निश्चय से, धर्म से विहीन मनुष्य, जीवित रहता हुआ भी मरे हुये के समान जानना चाहिये और धर्म से संयुक्त-मानव मरा हुआ भी इस लोक और परलोक में जीवित है।

**मित्रशत्रू च विज्ञेयौ पुण्यपापे शरीरिणाम्।**
**जीवेन व्रजतः सार्द्धं सुख-दुःखफलप्रदौ।।**

शरीरधारी प्राणियों के पुण्य और पाप, मित्र तथा शत्रु जानना चाहिए। सुख और दुःख फल को देने वाले पुण्य पाप ही जीव के साथ जाते हैं।

**ज्ञानयुक्तो भवेज्जीवः स्वर्गश्रीमुक्तिवल्लभः।**
**ज्ञानहीनो भ्रमेन्नित्यं संसारे दुःखसागरे।।**

सम्यग्ज्ञान से युक्त जीव, स्वर्ग लक्ष्मी तथा मुक्ति स्त्री का स्वामी होता है और सम्यग्ज्ञान से रहित प्राणी दुःखों के संसार सागर में नित्य भ्रमण करता है।

**यत्राचरति सज्ज्ञानी अज्ञानी तत्र वै चरेत्।**
**बध्यते कर्मभिर्ह्यज्ञो ज्ञानी कर्मच्युतो भवेत्।।**

सम्यग्ज्ञानी जीव जहां विचरण करता है, वहीं निश्चय से अज्ञानी जीव विचरण करता है; परन्तु अज्ञानी जीव कर्मों से बद्ध होता है और ज्ञानी कर्मों से मुक्त होता है।

**22, श्रीजीनगरं, दुर्गापुरा, जयपुरम्-18**

लौकिकन्यायेशब्दविचारः -

# गड्डुलिकाप्रवाहः

❑ डॉ. सत्यव्रत वर्मा

'साहित्यमिति शब्दो निश्शेषभङ्ग्या यत् कृतिजातम् अभिधत्ते तत्सकलं संस्कृतवाङ्मये विद्यते,' विन्टरनिट्जमहाभागस्यैतद् वचस्तद्वाङ्मयस्यामिताम् ऋद्धिं विस्तृतिं च सुतरां प्रख्यापयति। निखिले विश्वे एतदेवेदृशं साहित्यमस्ति यस्मिन् वेदोपनिषदादयः परमपावना धर्मग्रन्थाः कामसूत्र-रतिरहस्यप्रभृतयश्च कामशास्त्रीयाः कृतयः सध्रीचीनं वर्तन्ते, समे च ते समामर्हणामर्हन्ति। प्रहेलिकालोकोक्तीनामपि तत्रा-सदभावो नास्ति या मिथ्यैव लोकसाहित्यस्याङ्गभूता इत्यवगीयन्ते। 'न्याय' इति नाम्ना प्रथितास्ता अल्पिष्ठा उक्तयोऽपि तत्र सगौरवं विराजन्ते या भावगाम्भीर्याद् व्यवहारे पदे पदे लोकमुपकुर्वन्ति। न्यायनिचयो हि प्राचां प्रज्ञायाः शेवधिरस्ति। ऋषिपुङ्गवैः समाधिकल्पे गभीरचिन्तने यत् शाश्वतं सत्यं साक्षात्कृतं, जीवनसमरे च ये मधुरकषाया अनुभवा अधिगतास्ते पूर्वसूरिभिर-न्यायघटिकासु महता श्रमेण सञ्चिताः। निहितार्थगौरवाद् अमितप्रभावाच्च ते शास्त्रविमर्शं द्रढयितुं तत्कृतं कार्कशं वा लघयितुं साहित्येऽसकृत् प्रयुज्यमाना दृश्यन्ते। ते हि न्याया व्याकरण-दर्शन-काव्यशास्त्रादि-ग्रन्थेषु तद्भाष्येषु च प्रायेण तद्गतान् गूढविषयान् विशदवाचा प्रकटयितुमुपकरणीभवन्ति। कर्नलजैकबादयः केचित् न्यायकोविदास्तस्य तस्य न्यायस्य प्रभवं तात्पर्यं पूर्वाचार्यैश्च कृतं तद्विमर्शम् अवगाहितुं साभिनिवेशं प्रयतितवन्तः। केचन साम्प्रतिकाः कोषाः विमर्शाश्चापि तेषां प्रकृतिं हार्दं च विवरीतुं नः साचिव्यं (साहाय्यं) कुर्वन्ति।

विचार्यमाणं गहनं विषयं विशदयितुं रुचिरतां च तमापादयितुं देहलीदीप-स्थूणाखनन-दुर्जनतोष-स्थालीपुलाक-घुणाक्षर-काकदन्त-गवेषण-प्रभृतयः केचिन् न्यायाः कामं सुधीभिः पौनः पुन्येन प्रयुक्ताः सन्ति परं केचन न्याया ये विरलमेव दृष्टिपथमवतरन्ति। तेषु गड्डुलिकाप्रवाहन्यायः प्राधान्यं भजते। अयं त्रिकृत्व एव साहित्ये प्रयुक्त इति भणन्ति विज्ञाः। सत्यमेव अभिनवगुप्त-विश्वनाथाभ्यां स्वकृतिषूपात्तः। परमस्य सर्वात्मना साभिप्रायः प्रयोगो मम्मटकृते काव्यप्रकाशे लभ्यते, यमवलम्ब्य कैश्चिट् टीकाकारैः किमपि वाचस्पत्यं व्यतानि। इदं चात्रावधेयं यत्काव्यप्रकाशे सहित्यदर्पणे च गड्डुलिका-शब्द उररीकृतः परं तट्टीका कृद्भिः प्रायेण गड्डरिका शब्दोऽभ्युपगतः य 'रलयोरभेदः' इति न्यायात् गड्डुलिकातो न मनागपि भिद्यते।

काव्यशास्त्रालंकारभूते काव्यप्रकाशे गुणा-लंकारयोर्भेदं विवरीतुकामो मम्मटोऽष्टमोल्लासेऽत्र विषये प्राक्तनं दर्शनम् उपन्यस्तवान्। तदनुसारेण लौकिकगुणा-लंकारयोर्भेदः स्वयंसिद्धो न च विप्रतिपत्तिं सहते। हारादयोऽलंकाराः शरीरे संयोगसम्बन्धेन तिष्ठन्ति परं शौर्यादयो गुणास्तत्र समवायसम्बन्धेन वर्तन्ते। काव्य-गुणालंकारयोरेतादृशो भेदः कल्पयितुं न शक्यते उभयोस्तत्र समवायवृत्त्या विद्यमानत्वात्। तयोरभेदं न्यक्कृत्य तत्र भेदाभ्युपगतिर्गड्डुलिका प्रवाह इवान्धानुकरणमेव। समवायवृत्त्या शौर्यादयः संयोगवृत्त्या तु हारादयः इत्यस्तु गुणालंकाराणां भेदः, ओजः प्रभृतीनाम् अनुप्रासादीनां चोभयेषामपि समवायवृत्त्या स्थितिरिति गड्डुलिकाप्रवाहेणैवैषां भेदः 2। मम्मटेनेदम् उद्धरणं भामहकृतकाव्यालंकारस्य उद्भटविरचिताया भामहविवरणमित्याख्यायाष्टीकाया यथावद् गृहीतमिति काव्यप्रकाशभाष्यकारा स्वनामधन्या आचार्य-विश्वेश्वरमहाभागाः 3। एवं सति सप्रत्ययम् अभिधातुं शक्यते यद् गड्डुलिकाप्रवाह इति न्यायः प्रथमतयोद्भटेन नवमशताब्द्यां स्वीये विवरणे प्रयुक्तः। अथ चेदिदं भामहविवरणाच्छब्दशो नोपात्तं मम्मटेन च तस्य सारः स्वशब्दैरत्र न्यस्तस्तदपि न्यायस्यास्य व्याख्याने कोऽप्यन्तरायो न जायते।

काव्यप्रकाशस्य 'काव्यप्रदीपः' इत्याख्यायां टीकायां टीकाकृद् गोविन्दो न्यायस्य हार्दमेव प्राख्यापयत्

''तस्मात्तयोर्भेदाभिधानं गड्डुलिकाप्रवाहन्यायेन। तथाहि गड्डुलिका मेषी काचिदेका केनचिद्हेतुना पुरो गच्छति इतरास्तु विनैव निमित्तविचारं'' तामनुगच्छन्ति तथा केनाप्यालंकारिकेण गुणालंकारौ केनचिदभिप्रायेण भिन्नतयोक्तौ इतरे तु हेतुविचारं विनैव तदनुसारेण तद्भेदं वदन्तीति तदसम्यग्वेदितव्यम् 4। अयमस्य भावः। यथैका मेषी कथंचिद् कस्यांचिद् दिशि प्रतिष्ठतेऽन्या-मेष्योऽप्यविचार्यैव तामनुप्रतिष्ठन्ते, तथैवातीते केनापि सकारणमकारणं वा गुणालंकरयोर्भेदः प्रकाशितः स्यात्, परवर्तिनः काव्याचार्याः मन्यमानाः गुणालंकारभेदं यथावद् अभ्युपागच्छन्। इदं हि तद् यद् गड्डुलिकाप्रवाह उच्यते।

काव्यप्रकाशस्येतरे टीकाकाराः प्रायेणात्र विषये गोविन्दमतमेव पुनरावर्तयन् तस्य सारं वा तत्तुल्यशब्दैः उपास्थापयन्। गड्डुलिकाप्रवाहमाभाणकं मन्यमानेन श्रीविद्याचक्रवर्तिनाऽस्य व्याख्याने स्वीये भाष्ये यदुक्तं तद् गोविन्दमतेनाऽनल्पं साम्यं बिभर्ति ''गड्डुरिका प्रवाहेण बर्करप्रयाणन्यायेन।'' एकस्यां गड्डुरिकायाम् अर्थ-पर्यालोचनं विनैव पुरः प्रयातायां सर्वैव पंक्तिस्तमेव पन्थानं प्रमाणीकृत्य प्रवर्तते। प्रकृतेऽप्येतद् एवाभाणकम् आयातम् 5। श्रीवत्सलाञ्छनश्च प्रथमं गड्डुलिकाप्रवाहम् 'अनुपपन्नं वचः' आह यदुपजीव्य अभेदेऽपि भेदः कल्प्यते स च पूर्वेषां गौरवाद् गृह्यते। तस्यापरं व्याख्यानं लघु सदपि गोविन्दवचसो हार्दमेव व्यनक्ति यद्वा गड्डुरिका मेषी अविच्छेदेन तदनुगमनं प्रवाह। अकारणमेव मेषीयूथेन मेष्यनुगमनम् इति पिण्डितोऽर्थः।

एषां विद्वत्पुङ्गवानां व्याख्यानैरवदातमिदं यत्तन्मतेऽस्मिन् न्याये गड्डुलिका मेषीमभिधत्ते सकलश्च न्यायोऽन्धानुकरणस्य पर्यायोऽस्ति। परं गड्डुरिकाशब्द-स्तस्य कथितोऽर्थो वा प्राचीनकोषेषु नोपलभ्यते। तत्कथमेषोऽर्थष्टीकाकृद्भिरनुमितः कल्पितो वा? अपि तस्मात्कारणाद् अयमर्थः संशयमापन्नः? तत् सर्वं विचारणामर्हति। इदमत्र ज्ञेयं यद् गड्डुरी शब्दः (न तु गड्डुरिका) हेमचन्द्रकृतायां देशीनाममालायां पठितः परं तत्रायं बर्करीमाह न मेषीम् एतदुपजीव्यैव श्रीविद्याचक्र-वर्तिना 'गड्डुरिका प्रवाहेण' इत्यस्य वर्करप्रयाणन्यायेन इत्यर्थः कृतः स्यात्।

गड्डुलिकाप्रवाहः साहित्यदर्पणेऽपि प्रयोग-पदवीमवतीर्णः। षष्ठे परिच्छेदे त्रिषष्टिलक्षणानि त्रयस्त्रिंशन्नाट्यालंकारान् च व्यासेन व्यावर्ण्य विश्वनाथ उद्भटवत् सरहस्यं न्यगादीत्-एतानि हि प्रायेणाभिन्नानि मन्यन्ते परं पूर्वसूरीननुकृत्य तान्यप्यपृथक्तया निरूपितानि।''एषां च लक्षणं नाट्यालंकाराणां सामान्यत एकरूपत्वेऽपि भेदेन व्यपदेशो गड्डुलिकाप्रवाहेण 6।''

जीवानन्दविद्यासागरकृतम् अस्य व्याख्यानमल्पं सदपि नानुपपन्नम् ''गड्डुलिकाप्रवाहेण गतानुगति-कन्यायेन इत्यर्थः प्राचीनोक्तरीत्येति भाव:7।'' गतानुगतिकं गड्डुलिकाप्रवाहस्य भावार्थोऽस्ति नार्थः तदपि विवृत्यां न्यायस्य तात्पर्यं स्फुटतामितमिति मोदाय। हिन्दी भाष्यकृत् शालग्रामशास्त्री यथात्र वाचस्पत्यं व्यतनोत् तत्र तथ्यकल्पनयोः विचित्रः समवायो दृश्यते-''जैसे बैलगाड़ी लीक लीक चला करती है। जिधर से एक गई है इसी क्षुण्ण मार्ग से अन्य भी जाती है। पीछे जाने वाली प्रायः दूसरा सरल मार्ग निकालने का उद्योग सम्भव हो तो भी नहीं करती उसी प्रकार विशेष विचार न करके परम्परानुसार जो काम किया जाता है उसे गड्डुलिका प्रवाह कहते हैं 8।'' गड्डुलिकाशब्दस्य सम्यगर्थम् अजानानः शास्त्रिवर्य्यो ध्वनिसाम्याद् तस्य बैलगाडी (शकटम्) इत्यर्थम् अकार्षीत्। सुतरां सावद्यमिदम्। परं तस्य वाचस्पत्ये न्यायस्य हार्दं यथाकथञ्चित् आविष्कृतमित्याश्चर्यम्।

प्राचीनकोषेषु गड्डुलिका अथवा गड्डुरिका शब्दस्यास-द्भावेऽपि टीकाकृतः कथमस्य 'मेषी' इत्यर्थं कर्तुं प्राभवन् इति रहस्यमेव। इदमत्र स्मरणीयं यद् गड्डुरिका सुरवाचः शब्दो नास्ति। अयं हि टीकाकृद्भिर्लोकभाषात उपात्तो यत्रायम् अप्रतिहतं प्राचरत्। एतद्दृशाऽयं देशजः शब्दो वर्तते। अन्ये भूयांसः शब्दा इवायं शिष्टसाहित्ये पदमकरोद् उद्भटश्चैनं प्रथमतया

नवम्यां शताब्द्यां भामहविवरणे प्रयुक्तवान्। गड्डुरिका/गड्डुलिका देशजः शब्दोऽस्तीति सहधर्मिणा 'गडरिया' शब्देन सुतरां पुष्यते। गड्डुरिकाद्वादशशताब्द्यां 'गड्डुरी' इति रूपं दधारेति देशीनाममालातो निर्भ्रान्तं विज्ञायते। ध्वनिसाम्यं विभ्राणः गड्डुरिया शब्दः आकारेणापि गड्डुरीतो नातिदूरे वर्तते। यत्सत्यं गडरिया शब्दो गड्डुरिकार्थस्य द्वारभूतोऽस्ति। यतः गड्डुरिकाणां पालकः स्वामी वा 'गडरिया' इत्युच्यते, तेन गड्डुरिकाया एक एवार्थो भवितुं शक्यते, स चास्ति 'मेषी'। गड्डुरिका-गड्डुलिकाप्रवाहश्च मेषीणां विशिष्टं स्वभावजं प्रयाणं वक्ति यत्र सकलो यूथ एकामन्धवदनुसरति। तदेव भाषायां 'भेड़चाल' इत्यभिधीयते। गड्डुलिका-गड्डुरिका-प्रवाहोऽन्धानुकरणस्य पर्यायत्वं भजत इति सुतरामवदातं विमर्शेणानेन।

**संकेताः**


१. लौकिकन्यायाञ्जलिः, ए हैण्डफुल ऑफ पापुलर मैक्सिम्ज, निराजना प्रकाशकाः पुस्तक विक्रेतारश्च, देहली १९८३.

२. काव्य-प्रकाशः, व्याख्याकार आचार्य विश्वेश्वरः, काशी १९६०, ८/६७ इत्यत्र वृत्तिः पृ. ३८४

३. काव्य प्रकाशः, पूर्वनिर्दिष्टः, पृ. ३७८

४. काव्य-प्रदीपः, काव्यमाला २४ (पुनर्मुद्रणम्) वाराणसी ८/२, पृ. २७८

५. सम्प्रदायप्रकाशिनी, त्रिवेन्द्रम, १९२६

६. साहित्यदर्पणः (१-६ परिच्छेदाः), व्याख्याकारः शालग्रामशास्त्री, लखनऊ वि.सं. १९७८, परिच्छेदः षष्ठः, पृ. २८८

७. साहित्यदर्पणः, सम्पादकः जीवानन्द विद्यासागरः, कलकत्ता, १९२४, ६. ५१५, टीका पृ. ४९९

८. साहित्यदर्पणः, सम्पादकः शालग्रामशास्त्री, पूर्वनिर्दिष्टः, पृ. २८८



**पूर्व-प्राचार्यः, मानद प्रोफेसर**
**7/34, पुरानी आबादी, नामदेव फ्लोर मिल के पास, श्रीगंगानगरम्-335001**


# स्वागत-गीतम्

❑ डॉ. राजेन्द्रप्रसाद भट्टः

**( रागः - महामहनीय ! मेधाविन् ! त्वदीयं स्वागतं कुर्मः। )**

**स्वतन्त्रे भारते देशे स्थितानां शोभमानानाम्।**
**सुधीनां वन्दनीयानां सभायां स्वागतं कुर्मः।।**

**अहिंसा-संयम-त्याग-क्षमा-सत्यादि-वीराणां।**
**सदाचार-प्रसिद्धानां जगत्-सन्तोष-कर्तॄणाम्।**
**स्वतन्त्रे भारते देशे स्थितानां शोभमानानां।**
**सुधीनां वन्दनीयानां सभायां स्वागतं कुर्मः।।**

**स्वधर्म-ग्रन्थ-रक्षायै कृतीनां त्यक्त-सौख्यानां**
**स्वदेशे मोदमानानां सदैवाऽध्यात्म-धीराणाम्।**
**स्वतन्त्रे भारते देशे स्थितानां शोभमानानां**
**सुधीनां वन्दनीयानां सभायां स्वागतं कुर्मः।।**

**सुखे दुःखे च साम्यानां जगद्-बन्धुत्व-भावानां**
**चिरन्तन-ज्ञान-सिक्तानां सुधा-रस-पान-सक्तानाम्।**
**स्वतन्त्रे भारते देशे स्थितानां शोभमानानां।**
**सुधीनां वन्दनीयानां सभायां स्वागतं कुर्मः।।**

**सदा गोवर्धनाऽऽध्यक्ष्ये स्तुते विद्या-विहारेऽस्मिन्**
**विनम्राः संस्कृताश्छात्रा वयं पुष्पार्पणं कुर्मः।**
**स्वतन्त्रे भारते देशे स्थितानां शोभमानानां**
**सुधीनां वन्दनीयानां सभायां स्वागतं कुर्मः।।**


**पीठस्थ-राजकीय-शास्त्रि-संस्कृत-महाविद्यालयीयः प्राचार्यचरः, घोटादः ( सागवाड़ा ) डूंगरपुरम्, राजस्थानम्**

# महर्षिदयानन्दस्य षड्दर्शनसमन्वयः

❑ डॉ. गीता शुक्ला

वेदभाष्यकारः अन्धविश्वासनिवारकः राष्ट्रनिर्माता, समाजोत्कर्षकः युगपुरुषो महर्षिदयानन्दस्तस्य अखिले व्यक्तित्वे कृतित्वे च एका सुस्पष्टा चिन्तनधारा दृश्यते। ऋषिवरदयानन्दस्य दर्शनेऽपि स्पष्टता यथार्थवादिता गम्भीरता आडम्बरशून्यता वैज्ञानिकता च उपलभ्यते। स कथयति स्म यत् पूर्वमीमांसा-वेदान्त-न्याय वैशेषिक-सांख्यपोगाख्यानि षड्दर्शनानि उत्तमविदुषाम् अवश्यमेव अध्येतव्यानि।

महर्षेः मते सेश्वराणि षड्दर्शनानि सन्ति- सांख्यदर्शने-बहूनि सूत्राणि वर्तन्ते येषु ईश्वरस्य सिद्धिः वर्णिता। यथा-

**'स हि सर्ववित् सर्वकर्त्ता' - सांख्यदर्शन 3/56**
**'ईदृशेश्वरसिद्धिः सिद्धा' - सांख्यदर्शन 3/57**
**नेश्वराधिष्ठिते फलनिष्पत्तिः, कर्मणा तत्सिद्धेः 6/2-12**

ईश्वरसाक्षात्कारकरणाय योगिनाम् अबाह्यं प्रत्यक्षमवश्यमेव मन्येत। जैमिनीयपूर्वमीमांसायां मुख्यरूपेण कर्मणः प्रतिपादनं परन्तु तत्र ईश्वरस्य सिद्धेरसिद्धेर्वा प्रसंगोपात्त एव न भवति। वेदान्ते तु उपनिषत्प्रतिपाद्यमेव वर्तते-**अशब्दमस्पर्शमरूपमव्ययं तथारसं नित्यमगन्धवच्च यत्।** परं श्रुतौ ईश्वरस्य प्रत्यक्षं निगदितम्। (कठोपनिषद् 3/15) न्याय-वैशेषिकयोः वैशेषिके तु बहूनि सूत्राणि सन्ति अस्मिन् विषये।

यथा-

**'तद्वचनादाम्नायस्य प्रामाण्यम्' वैशे. दर्शन 1/1/3**
**संज्ञा कर्म तु अस्मद्विशिष्टानां लिङ्गम् वै. द. 2/1/18**
**'बुद्धिपूर्वा वाक्यकृतिर्वेदे' वै. द. 6/1/1**
**प्रत्यक्षपरिकलितमप्यर्थम् अनुमानेन बुधुत्सन्ते तर्करसिकाः**

सत्यार्थप्रकाशस्य सप्तमे समुल्लासे ऋषिवर-दयानन्दः कथयति-मीमांसा का धर्मधर्मी से ईश्वर। वैशेषिक और न्याय से भी 'आत्मा' शब्द से अनीश्वरवादी नहीं, क्योंकि सर्वज्ञत्वादि धर्मयुक्त और जो सर्वत्र व्यापक और सर्वज्ञादि धर्मयुक्त सब जीवों का आत्मा है, उसको मीमांसा, वैशेषिक और न्याय 'ईश्वर' मानते हैं।

महर्षेः दयानन्दस्य दार्शनिकी दृष्टिः वैदिकषड्-दर्शनेषु विरोधं न पश्यति प्रत्युत् अखिले वैदिकवाङ्मये आस्तिकदर्शनेषु समन्वयं प्रदर्शयति। दयानन्दस्य एषा धारणा वर्तते यत् विरोधाविरोधौ न जानीते सैव षड्दर्शनेषु विरोधं पश्यति।

सृष्टिविद्यायाः पृथक्भूतषड् अवयवानां षट्शास्त्रेषु प्रतिपादनात् तेषु किञ्चिदपि विरोधः नास्ति। वैद्यकशास्त्रे निदानचिकित्सौषधिप्रधानपथ्यानां प्रकरणानि पृथक्-पृथक् उच्यन्ते परं सर्वेषां तात्पर्यं रोगनिवृत्तिः एव भवति तथैव सृष्टेरपि षड्कारणानि व्याख्यातानि विविधेषु दर्शनेषु। तेषु विरोधलवोऽपि नास्ति।

सत्यार्थप्रकाशस्य अष्टमे समुल्लासे षड्दर्शन-समन्वयविषये ऋषिणा दयानन्देन प्रश्नोत्तररूपेण एका महती चर्चा कृता- प्रश्नकर्ता प्रश्नं करोति- ननु सृष्टिविषये वेदादिशास्त्राणि विरुद्ध्यन्ते यतो हि-तैत्तिरीयोपनिषदि-आकाशादिक्रमेण, छान्दोग्योपनिषदि-अग्न्यादिक्रमेण, ऐतरेये च जलादिक्रमेण सृष्ट्युत्पत्तिः वर्णिता। वेदेषु अपि चित् पुरुषात् चित् हिरण्यगर्भादिभ्यः, मीमांसायां कर्मणः वैशेषिके कालात्, न्यायदर्शने परमाणुभ्यः, योगे सांख्ये पुरुषार्थात् प्रधानात् वेदान्ते च ब्रह्मणः सृष्ट्युत्पत्तिः वर्णिता अस्ति। कतमः तत्र सत्यम् असत्यं वा जानीमहे-

अत्र इदम् अवधेयं- महाप्रलयानन्तरं पुनः सर्गारम्भः प्रारभ्यते एवं यदा प्रलयो वह्न्यन्तः सम्पद्यते आकाशवायू तु अवशिष्येते ततः सर्गारम्भः वह्नेः सञ्जायते। यदा च अग्निविद्युतौ न विनश्यतः तदा अद्भ्यः सर्गारम्भः सञ्जायते। यस्मिन् प्रलये यावतां प्रलयः सम्भवति ततः परस्मिन् सर्गे तत एव सृष्टिः उत्पद्यते इति भावः।

ऋषिवर दयानन्दः वाक्यमेकमुपदिशति-

'एकस्मिन्नेव कार्ये विषये वा विरुद्धवादो 'विरोध' इत्यभिधीयते।' षट्सु अपि दर्शनेषु परस्पराविरोध इत्यवधेयम्। मीमांसायां नास्ति जगति तादृक् किमपि कार्यं, यस्य निर्माणे न क्रियते कर्मचेष्टा। वैशेषिके कालमन्तरेण नोत्पादयितुं शक्यते किमपि। न्याये उपादाननिमित्ताभावे न किञ्चिदपि निर्मीयते। योगशास्त्रे विद्या-ज्ञान-विचाराणाम् असद्भावेऽपि न जायते। सांख्ये-तत्त्वानां संयोगं बिना नोद्भवितुमर्हति। वेदान्ते असति निर्मातरि न केनापि पदार्थेन शक्यमुत्पादयितुम्।

अतः षड्भिः कारणैः इयं सृष्टिः उत्पद्यते। तेषां च षण्णां कारणानाम् एकैकं व्याख्यातं प्रतिशास्त्रमिति नास्ति कश्चिदपि विरोधः।

एवं महर्षिदयानन्दोऽपि षड्दर्शनेषु क्वापि विरोधलेशं नैव व्यवहरति।

**एसो. प्रो. संस्कृत विभागः**
**भ.दी.आ.क. स्नातकोत्तर महाविद्यालयः**
**लखीमपुर-खीरी**

# विधेः व्यवस्था भवतीदृशी

❑ डॉ. राकेश शास्त्री

**ज्योतिः कणस्त्वेकः खलु वाञ्छति पुञ्जभावम्।**
**न सहन्ते केचिदन्ये दृष्ट्वा च तमीर्ष्यया।। 1।।**
**चिन्तयन्ति त एवं भूत्वा दीप्यते चेदनेन।**
**पुञ्जो यदि भविष्यति कीदृशी साऽवस्था।। 2।।**
**अथोत्थाय ते क्षिपन्ति तं गह्वरेऽन्धतमसि भयेन।**
**चिन्तयति तत्र खलु स तु दुःखेन दारुणेन।। 3।।**
**अपि भविष्यति ममेच्छा पूर्णा पुञ्जीभवाय।**
**तस्यासीद् वाञ्छा वै प्रकाशं ज्ञानस्य दानाय।। 4।।**
**आसीद् वै तस्मिन् वैकल्यमेतद्।**
**भवेदनुकूला व्यवस्था कदापि।**
**किमपि दास्यामि किल तदैव**
**सर्वेभ्योऽल्पं वै जनेभ्यः।। 5।।**
**गह्वरे तस्मिन् दृष्ट्वा च तं**
**फुल्लिताः वै ते सर्वे जनाः।**
**अनेन सर्वेण सः खलु कणः**
**संजातः किल खिन्न-मनाः।। 6।।**
**तदैव महापुरुष एकोऽवातरदिव पुण्यो महान्।**
**दृष्ट्वा च तस्य ज्योतिःकणस्य शक्तिम्।। 7।।**
**मनसस्सहसैव च तस्य वागेषा खलु निस्सरिता।**
**एषस्तु शक्यते दातुं सर्वेभ्यः वै प्रकाशमतुलितम्।। 8।।**
**तदैवोत्थापितं तं गह्वराद् गभीरा-**
**दनुकूलं च किल तस्मै प्रदत्तम्।**
**वातावरणसंरक्षणं च सहजं**
**तेन कणोऽभूत् तेजस्वरूपम्।। 9।।**
**तदानीं तु स ददाति स्म**
**निर्मलमद्भुतं ज्ञान-प्रकाशम्।**
**जनेभ्यः खलु संसारेऽस्मिन्**
**मनोऽऽह्लादकारकम्।। 10।।**
**दृष्ट्वैतत्ते सर्वे जनाः संजाताः वै मुखम्लानाः।**
**यैर्पातितं तं गहने तस्मिन् गह्वरेऽन्धतमसि गभीरे।। 11।।**
**एतत्सर्वं दृष्ट्वा तु दृढीभवत्येषा वै धारणा।**
**चलति मनोबलं यदा सदैव**
**धैर्यव्रतं स्वीकरणं तदैव।। 12।।**
**भूतेऽधर्मस्य प्राबल्यं कोऽप्यवतरति जनो महान्।**
**जानन्ति ते न ''साधवः'' खलु**
**विधेः व्यवस्था भवतीदृशी।। 13।।**

1-जे-38, हाउसिंग बोर्ड कॉलोनी, बांसवाड़ा (राज.)

पुस्तकसमीक्षा

❑ म.म. देवर्षिकलानाथशास्त्री
प्रधानसम्पादकः

# आधुनिकसंस्कृतसाहित्यविमर्शग्रन्थः

सुमहतः प्रमोदस्यायं विषयो यद् याममरभाषां चिरयुवतीं संस्कृतां गिरं भारतविरोधिनः केचिद् वैदेशिका ''मृतभाषे'' ति व्यपादिशन्, प्राचीना सेयं भाषा नैवाधुनिकं साहित्यं प्रकाशयतीति मृषा धारणाऽपि प्रावर्तत, तस्यां संस्कृतभाषायां सुमहति परिमाणे नूतनं साहित्यं, नूतनासु विधासु विंश्यां शताब्द्यामपि प्राकाश्यत, एकविंश्यां शताब्द्यामपि। सर्वमिदमजानन्तः प्राचीनपथावलम्बिनः शुष्कपण्डिता विश्वविद्यालयेषु संस्कृतपाठ्यक्रमे प्राचीन-शास्त्राणां, काव्यानां कथानां च समावेशं कुर्वाणाः, साहित्यपाठ्यग्रन्थानां सीमानं केवलं ''शिवराजविजय'' पर्यन्तं निर्धारयन्तः आधुनिक-साहित्यस्य कुत्रापि समावेशं विंशशताब्दीपर्यन्तं नैवाऽकुर्वन्निति कथान्तरं किन्तु विद्वद्गोष्ठीषु, सम्मेलनषु विश्वविद्यालयीयविचारसभासु च गतेषु पञ्चषेषु दशकेषु ''आधुनिकसंस्कृतसाहित्यं'' विमृशन्तोऽनेके कार्यक्रमाः समायोज्यन्त, यथा सहस्त्रश आधुनिक साहित्यरचनाः (काव्य-नाटक-रेडियोनाटक-कथा-ललितनिबन्धादयः) कविभिः कथाकारैश्च प्रणीताः प्राकाश्यन्त, तथैवाधुनिकसाहित्यमवलम्ब्य शोधं विमर्शं च कुर्वाणाः शतशो ग्रन्था अपि प्राकाश्यन्त। विश्वविद्यालयेषु शोधोपाधिभ्यः प्रस्तुता अपि शतशः प्रबन्धा आधुनिक-संस्कृत-साहित्यं विमृशन्ति, शिक्षणसंस्थाभिः, अकादमीभिः, प्रकाशकैश्चापि प्रकाशिताः सन्ति बहवः आधुनिकसंस्कृतसाहित्यसमीक्षणपरा विमर्शग्रन्थाः।

एवंविधा ग्रन्थाः संस्कृतेऽपि सन्ति, हिन्दीभाषाया-मपि, आङ्गलभाषायामपि। सुतरां प्रसीदेयुः सुधियो वृत्तमिदं विज्ञाय यत् केन्द्रीयसाहित्यअकादम्या (दिल्लीस्थया) प्रेरितेन केरलीयकालीकटविश्वविद्यालयीयसंस्कृतविभागेन दशवर्षपूर्वं 29-31 मई 2007 दिनाङ्केषु 'एकविंश्यां शताब्द्यां संस्कृतम्' इति विषयमवलम्ब्याखिलभारतीया विद्वद्गोष्ठी समायोज्यत यत्र बहुभिर्विश्रुतैर्विद्वद्भिः शोधपत्राणि प्रास्तूयन्त, व्याख्यानानि व्यधीयन्त, विचारविमर्शा व्यधायिषत। केरलेषु संजातेयं गोष्ठीति प्रायशो विचारविमर्शस्य भाषा आङ्गलभाषाऽभूत्, संस्कृतादयोऽन्या अपि भाषा अभाष्यन्त।

सन्तोषस्यायं विषयो यदस्यां संसदि प्रस्तुतानां शोधपत्राणां संकलनं केन्द्रीयसाहित्यअकादम्या 2015 ई. वर्षे प्राकाश्यत। कालीकटविश्वविद्यालयसंस्कृतविभाग-प्रमुखेन प्रो. सी. राजेन्द्रन् महोदयेन सम्पादितेऽस्मिन् ग्रन्थे पञ्चसु प्रकरणेषु 19 शोधपत्राणि विविधैर्विद्वद्वर्यैर्विदुषीभिश्च विलिखितानि द्रष्टुं शक्यन्ते येषु व्यापके फलके विषय-वैविध्यं स्पष्टीभवति। एकविंश्यां शताब्द्यां संस्कृतस्य स्थितिः, संस्कृते आधुनिकसाहित्यरचनाः, विज्ञानप्रविधि-सम्बद्धा रचनाः, विधिन्यायादिसम्बद्धा रचनाः, इति विषयानवलम्ब्य प्रस्तुता शोधनिबन्धाः साम्प्रतिकीं स्थितिं साधु विमृशन्ति। उपोद्घाते प्रो. राजेन्द्रन्वर्येण देशे संस्कृतस्य स्थितिर्विवेचिताऽस्ति।

ग्रन्थेऽस्मिन् एकविंश्यां शताब्द्यामवतीर्णं सर्जनात्मक-संस्कृतसाहित्यमेव न विमृष्टमपितु वैज्ञानिकं, सामाजिकं, विधिशास्त्रीयमन्यविधं चाऽपि साहित्यं विमृष्टमित्यस्य विशेषः। आङ्गलभाषाबद्धत्वेऽपि सर्वे शोधनिबन्धाः संस्कृतसेविनां कृते प्रमोदकरा भवेयुरित्यवधार्य ग्रन्थस्यास्य सूचनाऽत्र प्रस्तूयते। एतस्या विचारगोष्ठ्या अनन्तरमपि एकविंशशताब्दीगतस्य संस्कृतेखनस्य विमर्शाय बहवः शोधप्रबन्धाः प्राणीयन्त, बहवो ग्रन्था अपि प्राकाश्यन्ते-त्यादिसूचना अस्माभिः समये समये पाठकेभ्यः प्रस्तुता अपि। सोऽयमाङ्गलभाषानिबद्धो ग्रन्थोऽधुनैव प्राप्त इति कृत्वाऽस्य सूचना सम्प्रत्युपह्रियते पाठकेभ्यः।

**संस्कृत इन द ट्वेन्टीफस्ट सेंचुरी Sanskrit in the Twentyfirst Century सम्पादकः प्रो. सी. राजेन्द्रन् प्रका. साहित्य अकादेमी, रवीन्द्रभवन, 85 फीरोजशाह मार्ग, नई दिल्ली। पृ.सं. 230 मू. 300/-**

ग्रन्थसमीक्षा

❑ डॉ. शिवदत्तशर्मा चतुर्वेदी
राष्ट्रपतिसम्मानितः

# आङ्ग्लभाषायां संस्कृतसमीक्षणम्

विश्वस्य प्राचीनतमायाः समृद्धतमायाश्च संस्कृत-भाषाया वाङ्मयस्य विविधान् पक्षान् विवेचयितुं लक्षशो ग्रन्था विश्वस्य विविधासु भाषासु निबद्धाः प्रकाशिताश्च सन्तीति विश्वविदितं तथ्यम्। संस्कृतसेवायै विश्वस्य सर्वैर्देशैः, प्रमुखतो भारतस्य सर्वैरञ्चलैः, सर्वैश्च राज्यैः शताब्दीभ्यः सुबहु कार्यं कृतं, विविधाः प्रयासा अनुष्ठिताः, विविधा योजनाः कार्यरूपे परिणमिताः। एवंविधानां कार्याणां कतिपयेषां परिचायनाय भारतविश्रुतैर्विद्वत्प्रवरैः राष्ट्रपति-सम्मानितैः, भारतशासनस्य द्वितीयसंस्कृताऽयोगसदस्यैः, भारतीपत्रिकायाः प्रधानसम्पादकैः, देवर्षिकलानाथशास्त्रि-भिराङ्ग्लभाषायां लिखितानां 10 शोधलेखानां सङ्ग्रहो राजस्थान संस्कृतअकादम्या प्रकाशितोऽस्ति। एते शोधलेखाः संस्कृतसेवाया विविधान् पक्षान् विवेचयन्ति, संस्कृत-वाङ्मयस्य विविधान् सिद्धान्तांश्च विश्वजनीनफलकोपरि परीक्ष्य परिचाययन्तीति विशेषोऽस्य संकलनस्य।

शास्त्रिवर्याः संस्कृविद्वांसः, सर्वशास्त्रविशारदाश्च सन्तीति सुविदितं किन्त्वेते आङ्ग्लभाषाया अपि प्रौढाः विद्वांसः, विश्वविद्यालये आङ्ग्लसाहित्यप्राध्यापकपदमधित-स्थिवांसः, विश्वस्य विविधभाषावाङ्मयेषु कृतावगाहनाः समीक्षकाश्चापि सन्ति अत एभिः संस्कृतवाङ्मयस्य विविधपक्षाणामन्यभाषावाङ्मयैः सह तौलनिकं मूल्याङ्कन-मपि कृतमभूत्। एवंविधस्य तुलनात्मक-स्याध्ययनस्य प्रमापकाः कतिपये शोधलेखा अपि संग्रहेऽस्मिन् दृश्येरन्। यथा, संस्कृतस्योपमाऽलङ्कारः प्रसिद्धः, ''उपमा कालिदास-स्य'' उक्तिः सुविदिता। उपमाऽलङ्कारोऽन्यभाषाणां साहित्येऽपि प्रयुक्तचरः। होमरप्रभृतिग्रीककविमूर्धन्यैः, शेक्सपीयर मिल्टनप्रभृतिभिराङ्ग्ल- साहित्यकारैश्चोपमायाः प्रयोगः ''दीर्घोपमायाश्च'' विशिष्य निबन्धनं कथं कृतमिति तुलनात्मकमध्ययनमेकस्य निबन्धस्य विषयः, जलं खलु जीवनं, महाभूतेषु प्रमुखं, कथं भारतीयवाङ्मयेन भारतीयसंस्कृत्या च वर्णितमित्यन्यस्य निबन्धस्य विषयः, रससिद्धान्तोऽस्माकं काव्यशास्त्रे कथं वर्णितः, पाश्चात्य-काव्यनाट्यशास्त्रेषु तस्य किमनुरूपं, एवंविधानां विषयाणां मनोविज्ञाननिकषोपर्यध्ययनमपरस्य निबन्धस्य विषयः, काव्यशास्त्रिषु, कविप्रवरेषु चाऽग्रगण्यस्य पण्डितराज-जगन्नाथस्य सर्वाङ्गीणं परिचायनमेकस्याऽन्यस्य निबन्धस्य विषयः।

इत्थं नूतनानां क्षितिजानामुद्घाटनं कुर्वाणानां शोधलेखानां प्रणयनं विविधभाषाभिज्ञानां देवर्षिवर्याणामेव लेखन्याः शक्तिरिति विश्रुतानां पद्मभूषण डॉ. सत्यव्रत-शास्त्रिवर्याणां, जयपुरस्थ म.म.प्रो. दयानन्दभार्गववर्याणां चाभिमतद्वयमपि प्रकाशितमस्ति।

ग्रन्थेऽस्मिन् आधुनिकसंस्कृतसाहित्यप्रणयनस्य विविधपक्षाणां प्रकाशक एकः शोधलेखो नूतनान् सर्जनात्मकसाहित्यप्रणेतॄन् परिचाययति। जयपुरनगर-संस्थापकेन सवाईजयसिंहमहाराजेन अष्टादश्यां शताब्द्यां योऽश्वमेधयज्ञः कृतोऽभूत्, तस्य सुविस्तृतः परिचयो निबन्धे एकस्मिन् प्रदत्तोऽस्ति। अन्ते निबन्धचतुष्टये राजस्थान-राज्यस्य संस्कृतसेवायाः प्रामाणिकं विवरणं निबद्धमस्ति। गतशताब्दीषु लिखितस्य संस्कृवाङ्मयस्य परिचयः ''राजस्थाने विविधानां धर्मसम्प्रदायानां प्रसारः साहित्यं च,'' संस्कृतशिक्षाया राजस्थाने इतिहासः, ''वैदिकशिक्षाया राजस्थाने इतिहासः'' इत्यादि शीर्षकाणि स्पष्टीकुर्वन्ति यद् राजस्थाने संस्कृतप्रसारस्य सुविस्तृतं विवरणमस्मिन् ग्रन्थे निहितमस्ति।

इत्थं विविधेषु क्षितिजेषु संस्कृतगिराया मार्तण्डस्य प्रकाशो व्याप्तोऽस्तीति प्रमाणयन् निबन्धसंग्रहोऽयं वैदेशिकान् पाठकानपि संस्कृतसेवायाः कतिपयान् पक्षान् प्रदर्शयेदिति दृशा आङ्ग्लभाषामाध्यमेन निबद्धः प्रतीयते। एवंविधस्य ग्रन्थस्य प्रकाशनं नूतना दिशः प्रकाशयतीति सर्वात्मना प्रशस्यमेव। ग्रन्थस्यास्य प्रकाशनोपलक्ष्ये लेखककवर्यो विद्वन्मूर्धन्यो म.म. देवर्षिकलानाथशास्त्री शतशः सभाजनवाग्भिः संमान्यते, शतशः साधुवादेभ्यश्चास्य प्रकाशिका राजस्थान संस्कृत अकादमी अभिनन्द्यते।

**द होराइजन्स ऑफ संस्कृत ( The Horizons of Sanskrit ) ले.म.म. देवर्षिकलानाथशास्त्री, प्रका. राजस्थान-संस्कृत-अकादमी, झालाना सांस्थानिक-क्षेत्रम् झालाना डूंगरी, जयपुरम्। पृ. 140 मू. 90/-.**

**गेम विलेज, लालमाटी, गुवाहाटी ( असम )**

श्रीमतां बाबासाहेबआप्टेमहोदयानां व्यक्तित्ववर्णने-

**एकोनत्रिंशः प्रसङ्गः**

# भावुकमन्तःकरणम्

❑ वेणीमाधव गो. धर्माधिकारी

राजस्थान प्रान्त प्रचारकाः श्रीमन्तो ब्रह्मदेवशर्माणो वर्णयन्ति। घटनेयं 1946 ई. वर्षस्यास्ति। पञ्चनदप्रान्तस्य सर्वेभ्यः प्रचारकेभ्यः कतिपयैतिहासिकस्थानानि प्रदर्शयितुं कार्यक्रम आयोजित आसीत्। वयं प्रायस्त्रिशतपरिमिताः बन्धव आस्म। बाबा महोदया अपि सहैवाऽऽसन्। सरहिन्दुजङ्शनतः प्रायश्चत्वारिमाइलदूरे ''फतेहगढ साहेब'' नामकमेकं लघु बाष्पयान-विश्राम-स्थलमस्ति। यत्रैकं भव्यं गुरुस्थलं (गुरुद्वारा) निर्मितमस्ति। इदमेव तत्स्थानं यत्र दशमेशगुरूणां गोविन्द-सिंहमहाराजनां पुत्रद्वयं फतेहसिंहो जोरावरसिंहश्चा-त्याचारिभिर्मुगलशासकैः भित्तिकायामवचितम्। वयं सर्वे गुरूद्वारे सम्प्राप्ताः। बाबा महोदया अग्रे आसन्। प्रासादे सम्प्राप्तास्तदावबोधिता इदमेव तत्स्थानं यत्र गुरु-महाभागानां पुत्राववचितौ। बाबा महोदयास्तत्स्थले साष्टांगप्रणाममकुर्वन्। वायु-मण्डलमतीव निस्तब्ध-मासीत् यद् गुरुपुत्रयोर्बलिदानगाथावर्णनेन सह गम्भीरमप्यभूत्। इयद् गम्भीरं यद् बाबा महोदयाः प्रलपन्तो रोदनमकुर्वन्। ''अहो कियती क्रूरता'' इयमेव ध्वनिस्तेषां मुखान्निस्सृता। तत्र स्थितिरेव तेषां कृते असम्भवासीत्। अश्रूणि प्रोञ्छन्तस्ते बहिरागताः। किञ्चित्कालं तु सर्वत्र शून्यता संव्याप्ता। अनन्तरं ते स्वयमेवावदन्-परं बालकावपि कीदृशावास्ताम्। न जाने केन लोहेन निर्मितौ। प्रतीष्टकाभित्तिरुत्थिता जायमाना स्यात्, तदा कियती भयावहा वेदना जायमाना स्यात्, कियान् श्वासावरोधः स्यात्, अङ्गे-अङ्गे स्फुरणं जातं भवेत्, परमहो शौर्यं, तौ किञ्चिदपि विचलितौ न बभूवतुः। अत एव तु वयमियत आघातान् विषह्यापि गर्वेण मस्तकमुन्नमयन्तो जीवामः।

अग्रिमे दिने वयं चमकोरदुर्गे गताः। रोपडस्थाना-न्नौकायामुपविश्य गताः। अत्यानन्दमयी यात्रासीत्। चमकोर-गुरुद्वारस्थाने सम्प्राप्ता वयमवबोधिता यद् गुरुगोविन्दसिंह-महाराजानां द्वौ ज्येष्ठौ पुत्रौ अजीतसिंहो जुझारसिंहश्च शत्रुभिस्सह युद्ध्यन्तौ तत्रैव बलित्वं प्राप्तौ। दुर्गदर्शनानन्तरं बाबामहोदयानां प्रवचनमभूत्। तैरुक्तम् भारतस्य धूलिकणेभ्य उत्पन्नैर्लघुतमैर्बालकै-र्गीतायाः वचनं सत्यं प्रमाणीकृतम्। आत्मनोऽमरत्वस्य, देशधर्मं प्रति च प्रचण्डस्वाभिमानस्य संस्कारस्तयो रक्ते आसीत्। सद्भाग्येन ताभ्यां जनन्यप्येतादृशी सम्प्राप्ता यया तृषया पीडिताभ्यां जलयाचनां कुर्वद्भ्यां कथितम्गच्छतं रणाङ्गणे शत्रुशोणितेन तृषाशान्तिं कुरुतम्, नास्त्यत्र जलम्। शब्दान् कथयतां बाबा महोदयानां वक्षः प्रफुल्लितम्।

महाराष्ट्रप्रान्ते 'बाबा' नाम गृहे आव्हानाय बालानामपि भवति। परं पञ्चनदप्रदेशे तु नामेदं वृद्धानां कृते एव प्रयुक्तं भवति, तेन भ्रमो भवति। बाह्यरूपेण ते वृद्धा एव भासन्ते स्म। चमकोरदुर्गे सन्ध्यासमयो जायमान आसीत्। रोपडस्थानं तत एकादशमाइलात्मके दूरे आसीत्। नौकया गमनार्थं तु प्रातःकालपर्यन्तं प्रतीक्षा करणीया भवतिस्म। अतः सर्वे चिन्तामग्ना आसन्, बाबा महोदयं रोपडस्थानं यावत् कथं प्रापणीयमिति। अन्यत् किमपि वाहनादिकमपि नासीत्। प्रचारकेभ्यः सर्वेभ्योऽपि गर्वमासीत् यत्तेतु युवानः पद्भ्यामपि गन्तुं शक्नुवन्ति परं बाबा महोदयास्तु वृद्धाः कथं गमिष्यन्ति। विलम्बं जायमानं दृष्ट्वा बाबा महोदयेन स्वयमेव पृष्टं रोपडस्थान-मितः कियद्दूरमस्ति ? यदा तेऽवबोधिता

एकादशमा-इलात्मिकी दूरतेति तदा तैः कथितमलमेषैव चिन्ता? चलत पद्भ्यामेव चलामो वयम्। वसन्त रायओकमहोदयाः वच्छराजव्याससदृशाश्च प्रमुखाः कार्यकर्त्तारस्तानवरोद्धुं चेष्टां कृतवन्तः परं ते तु स्वछत्रं स्कन्धे संस्थाप्य प्रचलिताः। ते तु दर्शने एव वृद्धाः, एतादृश्या मत्ततापूर्णया गत्या प्रचलिताः यत् सर्वे पृष्ठतस्त्यक्ताः। अन्ते च तैः सह केचनैव चलितुमशक्नुवन्। प्रायः सर्वे एव तैः पराजिताः। यूनां यौवनस्य गर्वोभग्नः, सहैव च स भ्रमोपि भग्नो यत्ते वृद्धाः इति। ते तु सर्वदैव युवान आसन्।

संगठनाज्ज्येष्ठो नैव कोऽपि भवितुं शक्नोति। ईस्वीये 1970 वर्षे दीपावल्यवसरे सर्वे प्रान्तप्रचारकाः, क्षेत्रीयप्रचारकाः, अखिलभारतीया अधिकारिणश्च विवेकानन्द-शिलास्मारकस्स रामेश्वरं-मदुराया दिस्थानानां च यात्रार्थं गताः। परमपूज्याः गुरवो नासन् सह। मदुरैरामेश्वरादि-स्थानेषु मन्दिरेषु दर्शनसमये विशेषपूजायाः सम्मानं प्रदातुं मन्दिराधिकारिभिर्योजना कृतासीत्। स्वाभाविकमिदं यदेत्तद् विधातुं सर्वेषामेव दृष्टिर्बाबा महोदये भवेत्। त एवैतत्कर्तुं योग्यतमा इति सर्वेषां मतमासीत्। स्वयं सरकार्यवाहकाः बाबासाहब देवरसमहो दया अवदन्-एतत्कर्त्तुं त्वस्माकं समीपे बाबामहोदया एव सन्ति। अहं तु पूजाविधानं नैव जानामि। अतस्त एव पूजां कुर्युरित्येव समीचीनं स्यात् परं बाबा महोदयैर्नैव स्वीकृतम्। तेषां कथनमिदमेव, व्यक्तिर्ज्येष्ठो भवतु नाम परं संगठनाज्ज्येष्ठो नास्ति। मान्यानां सरकार्यवाहकानामुस्थितौ मानमिदमहं स्वीकर्तुं नैव शक्नोमि। अन्ते च पूजा देवरसमहोदयैरेव कृता।

**ब्रह्मपुरी, जयपुरम्**

---

**प्रेरकप्रसङ्गशतकम्** **चतुःपंचाशत्तमः प्रसङ्गः**

# प्राचीनतमः शुचिताविचारः नृपाणां चारचक्षुता च

❑ **श्रीमती आराधना धर्माधिकारी**

जयपुरराज्यस्य लघुभूपतिम्यः स्वराज्ये निवासाय महाराजेन मानसिंहेन (द्वितीयेन) विभिन्नासु वसतिषु स्थानं प्रदत्तमासीत्। एवमेव धूलाभवनादयो निर्मिताः। धूलाभवनस्य पृष्ठ एवासीत् टेंडडाभवनम्। टेंडडाप्या सीदेकं लघुराज्यम्। अस्य भूपतिना क्रीतमेकं श्यामवर्णं कारयानम्। अतीव मनोहरं तद्। तद् द्रष्टुं पार्श्ववर्तिनां क्षेत्राणां जनसम्मर्द एकत्रितः। तदैव केनचित् चाटुकारेण कथितम्-महाराज यानमिदं लेच्छदेशादागतमतो दुग्धेन प्रक्षालयितव्यम्। दुग्धपूरितैर्विशालैः पात्रैर्दुग्धं प्रवाह्य यानमिदं स्नापितम्। सम्यक् प्रोंछ्य च तद् बहिरेव स्थापितम्। कतिपयक्षणानन्तरमेव तदुपरि मक्षिकाणामाक्रमणमभूत्। सर्वं यानं मक्षिकाच्छन्नमभवत्। जनानां प्रहसनमवरोधेपि न प्रशाम्यतिस्म। पुनः जनसंमर्द एकत्रितः। तदैव केनचिदपरेण चाटुकारेण कथितम्-महाराज! म्लेच्छदेशादागतं यानं तु गंगाजलेनैव पावनं भविष्यति। विचारस्य चास्य महती प्रशंसा समभवत्। हरिद्वारतो महत्सु ताम्रकलशेषु गंगाजलमागतम्। यानस्य प्रक्षालनं कृतम्, पूजनमपि विहितम्। घटनायाः प्रत्यक्ष-दर्शिभिस्तत्कालीनैः सूचनाप्रसारणनिदेशकैः मनोहर प्रभाकरमहोदयैः स्व-पुस्तके तस्य रोचकं वर्णनं कृतमस्ति।

**218, धर्माधिकारिभवनं, ब्रह्मपुरी, जयपुरम्**

❑ डॉ. कृष्णकुमार कुमावत

# साहित्यदर्पणस्य काञ्चन टीका:

**1. लोचनटीका - ( ख्रीस्तस्य चतुर्दशशताब्दी )**

साहित्यदर्पणस्य लेखकस्य विश्वनाथस्य पुत्रः श्रीमदनन्तदासो लोचनाख्यं व्याख्यानमकरोत्। अस्य लोचने ''यथा मम पितु'' रित्यादिना विश्वनाथकविराजस्य श्लोकानामुद्धारः कृतः। ''श्रीविश्वनाथकविराजात्मज-श्रीमदनन्तदासकृतौ'' इति कथनाद् विश्वनाथकविराजस्य पुत्रोऽनन्तदास इति ज्ञायते। एतट्टीका नातीव विस्तृताऽपि प्रमेयांशविचारे प्रौढिं प्रकटयति ग्रन्थं च सम्यक् योजयति। अनन्तदासेन ध्वन्यालोकस्य लोचनव्याख्यानवत् साहित्य-दर्पणस्य लोचनाभिधं व्याख्यानं रचितम्। अतः अनन्तदासस्य साहित्यदर्पणलोचनटीका साहित्यदर्पणस्य दुर्बोधार्थं प्रकटयितुं समर्था वर्तते।

**2. प्रमाटीका-**

गोपीनाथ वाजपेयी (ख्रीस्तस्य सप्तदशशताब्दी-मध्यभागः)। उत्कलीयविद्वान् गोपीनाथ वाजपेयी साहित्य-दर्पणस्य प्रमाटीकां, काव्यप्रकाशस्य सुमनोहराटीकां अप्ययदीक्षितकृत कुवलयानन्दस्य प्रभाटीकां चारचयत्। अस्य समस्तटीकाः पाण्डित्यपूर्णास्सन्ति।

**3. विज्ञप्रियाटीका-**

महेश्वरन्यायालङ्कारभट्टाचार्यः (ख्रीस्तस्य सप्तदश-शताब्दीमध्यभागः।) बंगाधिवासी महेश्वरन्याया-लङ्कारभट्टाचार्यः साहित्यदर्पणस्य विज्ञप्रियाटीकां रचयामास। टीकेयं सुप्रसिद्धा पाण्डित्यपूर्णा च विद्यते।

**4. विवृतिः टीका -**

रामचरणवागीशेन साहित्यदर्पणस्योपरि 'विवृति' इति नाम्ना टीकायाः रचना कृता। रामचरणवागीशेन बङ्गालप्रान्तस्य वर्धमानजनपदस्य रामावटी नामकस्थाने जन्म लब्धम्। अनेन स्वटीकायाः तिथिः २७०० ई. अङ्किता। विवृतिटीकायाः संस्करणः २-६९५(1915) ख्रीष्टाब्दे निर्णयसागरेण प्रकाशितोऽस्ति। रामचरणतर्कवागीशः अप्ययदीक्षितकृत-कुवलयानन्दस्य टीकामप्य-करोत्।

**5. टिप्पणटीका-**

साहित्यदर्पणस्य टिप्पणटीकायाः रचयिता मथुरानाथ-शुक्लोऽस्ति। श्रीमथुरानाथशुक्लः मालवप्रदेशस्यान्तर्गते पाटलीपुत्रजनपदे वसति स्म। टिप्पणटीकायाः रचना ख्रीष्टाब्दे अष्टादशशताब्द्यामभवत्। अयं साहित्यदर्पणस्य टिप्पणटीकाम् अप्ययदीक्षितकृतकु-वलयानन्दस्य टीकां च अकरोत्।

**6. लक्ष्मीटीका- ( ख्रीस्तस्य विंशशताब्दी )**

साहित्यदर्पणस्य लक्ष्मीटीकायाः प्रणेतार आचार्य-कृष्णमोहनशास्त्रिमहाभागास्सन्ति टीकेयं विद्वत्तापूर्णा सुबोधा सती विद्वज्जनानां बालानां च समादरमाप्नोति।

**7. विमल-टीका-**

**प्रणम्य परमात्मानं श्रीजीवानन्दशर्मणा।**
**साहित्यदर्पणव्याख्या विमलाऽऽख्या विरच्यते।।**

जीवानन्दविद्यासागर भट्टाचार्यः साहित्यदर्पणस्य विमलाटीकां कृतवान्। एकान्या सहित्यदर्पणस्य विमलाटीका हिन्द्यामपि वर्तते। अस्याः टीकायाः लेखकाः विद्या-वाचस्पति-साहित्याचार्य-शालिग्राम-शास्त्रिमहाभागा-स्सन्ति। शालिग्रामशास्त्रिमहाभागाः गुरुकुल-कांगडी विश्वविद्यालये (हरिद्वार) प्राध्यापकाः आसन्। वेदान्तगुरुकाशीनाथ-शास्त्रिमहोदयस्याज्ञया २-६७३ (1973) तमे विक्रमसंवत्सरे लेखनकार्यप्रारम्भोऽ-भवत्। अल्पसमयेनैषा टीका पूर्णा जाता।

**8. रुचिराटीका-**

आचार्यशिवदत्त कविरत्नः रुचिराटीकां रचयामास।

**9. विवृतिपूर्त्तिः टीका-**

**आचार्यरामचरणेन विकासितायां**
**यद्दर्पणस्य विवृतौ विकलत्वमस्ति।**
**तत्पूर्तये जयपुरेन्द्रसमाश्रितेन**
**दुर्गाप्रसादकृतिना क्रियते प्रयत्नः।।**

इत्थं मूलस्य विवृतेश्च पुस्तकचतुष्टयाधारेण प्राक् १-९०२ ख्रीष्टाब्दे मुम्बापूर्या निर्णयसागराख्ये यन्त्रालये मुद्रितस्यैव साहित्यदर्पणस्य विवृत्या विवृतिपूर्त्या च सहितं द्वितीयसंस्करणं प्राप्यते।

**10. कुसुमप्रतिमाटीका-**

विद्यालङ्कारभट्टाचार्यस्य पुत्रो महामहोपाध्यायो हरिदाससिद्धान्तवागीशभट्टाचार्यः साहित्यपर्दणस्य कुसुम-प्रतिमाटीकां रचितवान्।

**11. प्रभास्फूर्तिटीका ( ख्रीस्तस्य सप्तदशशताब्दी-शेषभाग )**

लोकनाथदीक्षितेन टीकेयं विरचिता। उत्कलीय विद्वान् लोकनाथदीक्षितः गोपीनाथवाजपेयिनः शिष्य आसीत्। टीकेयं विद्वत्तापूर्णा वर्त्तते।

**12. नूतनताराटीका -**

गुरुनाथविद्यानिधिभट्टाचार्यः साहित्यदर्पणस्य नूतन-ताराटीकां चकार।

**13. शशिकलाटीका-**

साहित्यपर्दणस्य सुप्रसिद्धा शशिकलानाम्नी हिन्दीटीका सत्यव्रतसिंहेन लिखिता। अस्याः टीकायाः लेखनं विंशशताब्द्यामभवत्।

एताः काञ्चन साहित्यदर्पणस्य टीकास्सन्ति।

**वरिष्ठ अध्यापक, शिक्षा निदेशालय, दिल्ली**

❑ कैलाशचन्द्र बुनकर

# वैदिकसंविधानं विधिश्च

वेदुषु सर्वासां विद्यानां सूत्राणि विद्यन्ते। वेदेषु ज्ञानविज्ञानस्य अनन्तभाण्डागारो विद्यमानोऽस्ति। राजनीतिशास्त्रं मानवजीवनस्य अभिन्नाङ्गम् अस्ति। राष्ट्र-जाति-समाजानां सुरक्षा, प्रजायाः हितं, विकासकार्यं, वैज्ञानिकी समुन्नतिः इत्यादि सम्पूर्णं राज्यस्य कुशलप्रशासने निर्भरमस्ति। चतुर्षु वेदेषु संविधान-राजनीतिशास्त्रादिसम्बद्धाः सहस्रशो मन्त्राः सन्ति। येन संवैधानिकं, राजनैतिकव्यवस्थायाश्च ज्ञानं मिलति यत् वैदिककाले व्यवस्थितरूपेण प्रचलने आसीत्।

**1. वैदिकसंविधानम् :-** संविधानस्यार्थोऽस्ति (Constitution) ते मौलिकसिद्धान्ताः यदनुगुणं कस्यचिद् देशस्य राज्यस्य वा प्रशासनं संचाल्यते। वैदिकसंविधानस्य रूपेरखा केवलं वेदेषु प्राप्यते। वेदेषु ब्राह्मणग्रन्थेषु च कतिपयविभिन्नशासनप्रणालीनां उल्लेखो मिलति। ताः शासनप्रणाल्यः स्वसंविधानानुसारं संचालिता भवन्तिस्म। यद्यपि वैदिकसंविधानं प्रायः अलिखितमस्ति तथापि अस्य विभिन्नसिद्धान्ताः वैदिकसाहित्ये इतस्ततः विकीर्णाः सन्ति।

**2. संविधानस्य उद्देश्यम्:-** वेदेषु संविधानशब्दस्य प्रयोगो नास्ति। ऋग्वेदस्य एकस्मिन् मन्त्रे विधानशब्दस्य उल्लेखोऽस्ति। मन्त्रे कथ्यते यत् इन्द्रः मासानां विधानं कृत्वा सूर्यं द्युलोके स्थापितवान् तत् साहाय्येन खण्डितचक्रं (वर्षचक्रं) सम्यक् कृतवान्। अनेन मन्त्रेण संकेतद्वयं मिलति।

1. राजानं संविधानं वा विना राज्यप्रशासनं अव्यवस्थितं तिष्ठति। अतः संविधानस्य स्थापना आवश्यकी अस्ति।

2. संविधानस्य कार्यमस्ति-अव्यवस्थायाः निवारणं व्यवस्थायाश्च स्थापना। [**मासां विधानमदधा अधि द्यवि, त्वया विभिन्नं भरति ''प्रधिं'' पिता।** (ऋ. 10-138-6)]

**3. संविधानस्य रचना:-** अथर्ववेदस्य एकेन मन्त्रेण संविधानस्य रचनायाः संकेतः प्राप्यते। मन्त्रस्यार्थोऽस्ति-तत्वज्ञा ऋषयः लोककल्याणस्य भावनया कांश्चन नियमान् निर्धारितवन्तः। ते तपः, अनुशासनं दीक्षां च सर्वप्रथमं स्वीकृतवन्तः एतेन राष्ट्रशक्तेः उत्पत्तिरभवत्। अतः देवताः तान् प्रणमन्ति।

**भद्रमिच्छन्त ऋषयः स्वर्विदस्तपो दीक्षामुपनिषेदुरग्रे।**
**ततो राष्ट्रं बलमोजश्च जातं तदस्मै देवा उपसंनमन्तु।।**

(अथर्ववेद 19-41-1)

अनेन मन्त्रेण संविधानसम्बन्धिसंकेताः प्राप्यन्ते।

**4. संविधानस्य मौलिकतत्त्वानि:-** अथर्ववेदे निहितानां मौलिकतावानां निर्देशः पृथिवीसूक्तस्य प्रथममन्त्रे प्राप्यते। येषां समावेशः प्रत्येकं संविधाने आवश्यकम्।

तानि तत्वानि सन्तिः-

**सत्यं बृहद् ऋतुमुग्रं दीक्षा तपो ब्रह्म यज्ञः पृथिवीं धारयन्ति।** (अथर्ववेद 12-1-1)

**सत्यं वा ऋतम्** (7-3-1-23)

**मनो वा ऋतम्** (जैमिनी-उप, 3-36-5)

ऋतम्-मनसा यथार्थ-संकल्पनम्।।

अथर्ववेदस्य कथनमस्ति यत् एत एव गुणाः सन्ति, ये पृथिवीं धारयन्ति तैरेव पृथिवी स्थिरा अस्ति। संविधाने तेषां समावेशः आवश्यकः।

**5. विविधसंविधानानि:** - वेदेषु ब्राह्मणग्रन्थेषु च विविधशासनपद्धतीनाम् उल्लेखोऽस्ति। यथा:- साम्राज्याय, भोज्याय, स्वाराज्याय, वैराज्याय, पारमेष्ठ्याय, राज्याय, महाराज्याय, आधिपत्याय, स्वावश्याय, आतिष्ठाय, अभिषिंचति (ऐत. ब्रा. 7-4-17)

प्रत्येकं संविधानानुसारं प्रशासकाय नृपाय वा. पृथक् उपाधयः नामानि च प्रदत्तानि सन्ति। तत् संविधानानुसारमेव राज्यस्य प्रशासन-व्यवस्था निर्मीयतेस्म। तस्य कार्यान्वयनं च भवतिस्म।

**6. वैदिकसंविधानानां प्रमुखविशेषताः:-** वेदेषु ब्राह्मणग्रन्थेषु च राज्ञः अभिषेकेन सम्बद्धा अनेके सन्दर्भाः सन्ति। शतपथब्राह्मणस्य कथनमस्ति यत् ''राजा वै राजसूयेनेष्ट्वा भवति'' ''सम्राड्वाजपेयेन'' अतः संविधानानुसारं राजसूयवाजपेयादियज्ञानामनुष्ठानम् आवश्यकं भवतिस्म। तत्पश्चात् तेन राज्ञा उपस्थित-जनसमूहस्य समक्षं राजकीयशपथग्रहणं करणीयम्। एतेषां सम्पूर्णविधीनां संक्षिप्तवर्णनं यजुर्वेदादिसंहितासु वर्तते। विस्तृतवर्णनं शतपथब्राह्मणादिषु प्राप्यते। नष्टराज्यस्य पुनः प्राप्तये सौत्रामणियज्ञः क्रियतेस्य। सार्वभौमनृपत्वावाप्तये अश्वमेधयज्ञः क्रियतेस्म। तैत्तिरीयब्राह्मणानुसारं असमर्थो

राजा अश्वमेधयज्ञं कर्तुं न शक्नोतिस्म। तथात्वे सः पदच्युतः क्रियते स्म। शतपथब्राह्मणे राजसूययज्ञस्य विधेः अभिषेकस्य च विस्तृतवर्णनं प्रदत्तम्। अस्मिन्नेव काण्डे सौत्रायणी-यागस्यापि वर्णनमस्ति। एतेषां यज्ञानां सम्पूर्ण-विधिविधानेनानुष्ठानम् अनिवार्यमासीत्। राज्याभिषेकस्य समग्रापि प्रक्रिया आद्योपान्तं निर्दिष्टविधानानुसारेण करणीयाऽऽसीत्। अत्र कथमपि परिवर्तनं अशास्त्रीयं मन्यते स्म। इत्थं विविधनियमानां समुच्चयः संविधानस्य रूपग्रहणम्अकरोत्। कोऽपि राजा अधीनस्थकार्मिको वा नियमानाम् उल्लंघनं कर्तुं न शक्नुवन्ति स्म। यदि कश्चित् एवं कुरुते तदा सः पदच्युतः क्रियते स्म। वैदिकसंविधानस्य प्रमुखविशेषताः संक्षेपेण निम्नप्रकारेण सन्ति।

1. वैदिकसंविधानं परमपुनीतं मन्यते। अस्य विभिन्नविधानामनुपालनं श्रद्धया भक्त्या च क्रियतेस्म। संविधानस्य कस्यापि धाराया उल्लंघनं पापं मन्यतेस्म। लघु-ज्येष्ठानां सर्वेषां कृते संविधानमिदं मान्यमनुल्लंघनीयं चासीत्।

2. वैदिकसंविधानं काठिन्यपूर्णं कथ्यते। अस्य संविधानस्य धारासु अथवा नियमेषु उपनियमेषु च सरलतया परिवर्तनं न कर्तुं शक्यते। ''विदथ नाम'' विशेषपरिषदेव नियमेषु उपनियमेषु च आवश्यकतानुसारं किञ्चित् सामान्यपरिवर्तनं परिवर्धनं वा कर्तुं शक्नोति स्म।

3. वैदिकसंविधानस्य कश्चिदंशो लिखितः कश्चिच्च अलिखित आसीत्। अस्य लिखितांशः वेदेषु ब्राह्मणादिग्रन्थेषु च अविकलं लिखितः। उपलभ्यते। अस्य अलिखितांशः जनसाधारणे प्रचलितप्रथासु न्यरूपेषु च विद्यमान आसीत्। अयं अलिखितांशोऽपि लिखितांशतुल्य एव सम्मान्यते स्म।

4. वैदिकसंविधानं देशकालपरिस्थित्यनुसारं विविध- रूपेण प्रचलितमासीत्। अतः अस्य राज्यं, महाराज्यं, साम्राज्यं, स्वाराज्यादि अनेकरूपाणि प्रचलितान्यासन्। संविधानानां विभिन्नताहेतुत्वात् शासन-पद्धतिषु अपि विभेदो दृश्यतेस्म। तदनुसारं विभिन्नराज्यानां स्थापना भवतिस्म। अत्र इदमुल्लेखनीयमस्ति यत् कतिपय-विभिन्नतासु सतीषु अपि संविधानस्य मूलतावं एकमेव विद्यते। अतः संविधानस्य आत्मा एक एव आसीत् इति ध्येयम्।

**विधि :-**

वेदेषु ब्राह्मणग्रन्थेषु च विधेः (LAW) कृते एकः पारिभाषिकशब्दः धर्म इत्यस्ति। वेदेषु धर्मशब्दस्य रूपद्वयं प्राप्यते। धर्मम् धर्मन् च अर्थात् अकारान्तन्नान्तं च रूपमेकं रामतुल्यं चलति अपरञ्च कर्मन् तुल्यम्। शब्दद्वयं (LAW STATUE OF ORDINANCE) अर्थे प्रयुक्तमस्ति। वरुणो धर्मपतिः इति नाम्ना सम्बोध्यते (PROTECTOR OF LAW) शतपथब्राह्मणस्य कथनमस्ति यत् वरुणः धर्मपतिः अर्थात् विधिविधानस्य संरक्षकः। राज्याभिषेकेन सह नृपो धर्मपतिः (विधिरक्षकः) उपाधिना अलंकृतो भवति। अतः सोऽपि धर्मस्य रक्षकः वरुणदेवस्य च प्रतिरूपः भवति। यजुर्वेदे राजा वरुण इति कथ्यते। यजुर्वेदे धर्मपतिः इति स्थाने ''धर्मणस्पति'' शब्दस्यापि प्रयोगोऽस्ति। तैत्तिरीय-संहितायां राज्ञः कृते संकेतोऽस्ति यत् सः धर्मस्य रक्षणाय नियुक्तः। यदि राजा प्रगतिशील उन्नतिशीलश्च भवितुं वाञ्छति तर्हि सः धर्मं पोषयेत्। मन्त्रे प्रगतिशीलतायै ''प्रेति'' इति शब्दस्य प्रयोगोऽभवत्। ऋग्वेदे धर्मः (विधिः) धारणार्थको मन्यते। उच्यते च यत् इन्द्रः धर्मेण पृथिवीं धारयति यः मर्यादित-संस्कारित व्यवस्थां विधिपूर्वकं करोतिस्म।

अतः भारतीयसंस्कृतिः वैदिकसंविधानाधारिता एवास्तीति वक्तुं शक्यते इति शम्।

**शोधार्थी ( धर्मशास्त्र )**
**ज.रा.रा.सं. विश्वविद्यालय, भांकरोटा, जयपुर ( राज. )**

## गीत-संस्कृतम्

**❑ बद्रीप्रसाद शर्मा ( व. अध्यापक )**

**जयत्वस्माकं संस्कृतभाषा जयत्वस्माकं गीर्वाणभाषा**
**सरसा सरला बोधगम्या अमृतमयी मम देवभाषा**
**कविमुनिपोषिता वाङ्मयरूपा ज्ञानदात्र्यस्माकं सुरभाषा**
**जयत्वस्माकं ........... ।।1।।**

**या सुरवाणी शान्तियुक्ता मंगलमयी मम देवभाषा**
**धर्मज्योतिषसाहित्यस्वरूपा वेदान्विता या संस्कृत्याश्रिता**
**जयत्वस्माकं ........... ।।2।।**

**सर्वत्र या सञ्चरति सुमङ्गलम् पुण्यमयी मम देवभाषा**
**कुण्ठां विषं हरति लोकानां क्षेमदायिनी संस्कृतभाषा**
**जयत्वस्माकं ........... ।।3।।**

**शुभश्रावणे पूर्णिमायाम् संस्कृतदिवसस्यायोजनम्**
**जयतु संस्कृतम् जयतु भारतम् सकलजनानामित्युद्घोषणम्**
**जयत्वस्माकं ........... ।।4।।**

**64, महावीर कॉलोनी, जालियारो,**
**ब्यावर, जिला-अजमेरः**

# चिकित्सायां वैदिकमन्त्रप्रयोगस्य औचित्यम्

❑ प्रवीणकुमार शर्मा

**शोध-सारांशः**-संस्कृतभाषायां चिकित्साशब्दस्यार्थाः ज्ञानेच्छा, दोषापहारः, संशयः, त्रिदोषसाम्यप्रयत्नः भैषज्यकर्माणि च सन्ति। रोगोत्पत्तेः हेतवः त्रिदोष-वैषम्य**म्**, प्रकृतिजन्यप्रभावः (बाह्यान्तः प्रकृति-वैषम्यम्), मनोदौर्बल्यानि च भवन्ति। वेदपुराणा-दिग्रन्थानुसारेण त्राणधर्मीवेदमन्त्रै आधिव्याधिश्चेति द्विविधरोगाणां-चिकित्सा-कर्म कर्तुं सर्वथा शक्यते।

**संकेताक्षरः** - स्वास्थ्यविघातः, नादरूपो, स्फुटतमा, पार्थिवपिण्डेषु, पावित्र्यं।

'चिकित्सा' शब्दो मूलतः किद् ज्ञानार्थकाद् धातोः सनिप्रत्यये स्त्रियां टापिकृते निष्पन्नो भवति। 1 अस्य व्युत्पत्तिलभ्योऽर्थस्तु ज्ञानेच्छा एवास्ति किन्तु कालान्तरेऽयं शब्दो दोषापहारार्थे रूढिमलभत। अत्र साहित्यशास्त्रीयाणामभिमतमस्ति यत् संशयार्थो विचिकित्साशब्दो बहुपूर्वं प्रचलित आसीत्। संशयापहारार्थकचिकित्साशब्दस्य ग्रहणं साहित्ये कालिदासोत्तरकाले बाहुल्येनसंजातम्। आयुर्वेदशास्त्रे चिकित्साशब्दप्रयोगः पुराणेषु उक्तत्वाद् गृहीतोऽस्ति। 2 शरीरे विद्यामानानां धातुमलादिजन्यदोषाणामपहाराय क्रियमाणः प्रयत्नश्चिकित्साशब्देवाच्यातांगतः। आचार्यः सुश्रुतश्चिकित्साशब्दां भैषज्यकर्मार्थे निरूढं करोतिः -

**''याभिः क्रियाभिर्जायन्ते शरीरे धातवः समाः।**
**सा चिकित्सा विचाराणां कर्मतद्भिषजां मतम्।।''**

अत्रापिदोषापहाररूपस्यार्थस्यैव प्रतिच्छाया वेविद्य-मानाऽस्त्याचार्यप्रवरस्य प्रतिपादने। आयुर्वेदमतेन-शरीरस्था धातव एव रोगोत्पत्तौ मूलरूपेण हेतुभूता भवन्ति। अतएव धातुवैषम्यविघातो येनाप्युपायेनभवेत् तत्सर्वं चिकित्साशब्देन बोधनीयम्। सुश्रुतस्य टीकाकारोऽत्र स्पष्टीकरोत्याचार्याभिमतम्-

**''तत्र धातुवैषम्यविघातार्थं विधीयमानः क्रियाकलापः वृद्धानां धातूनां ह्रासकरणं क्षीणानां वर्धनं कठिनानां मृदूकरणं मृदूनां काठिन्यसम्पादनं संहतानां विलयनं, विलीनानां वा संहतीकरणं प्रवहतां स्तम्भनं स्तब्धानां वा स्वेदनमित्या-दिबहुविधः।''**

टीकाकारमतेऽत्र रोगापहारोपायानां निर्देशविधा-विदंस्पष्टीकृतं यच्चिकित्सारोगापहारस्य समुचिता प्रक्रियाऽस्ति। वेदविज्ञानमत्र द्विधा प्रविभक्तोऽयं स्वास्थ्यविघातः। 5 आधिर्नाम मनसिनिपतितानां बाह्यान्तः प्रकृतिविकारप्रभावाणामसह्यतावशा-दनुभूयमानोत्पीडनविशेषः। व्याधिश्चशरीरेनिपतितानां बाह्यान्तः प्रकृतिविकारप्रभावाणामसह्यतावशादनु भूयमानोत्पीडनविशेषः।6

वेदविज्ञाने रोगाणामुत्पत्तौ यः आधारो गृहीतः स प्रकृतिजन्यप्रभावस्य परिणतिरूपोऽस्ति, किन्तुआयुर्वेदे यः आधारो गृहीतः सः शरीरान्तर्वर्त्तिधातुमात्रस्य-विकृतिरूपोऽस्ति। एवमुभयोः किंचिद्भेदो विद्यते। वेदविज्ञानस्य इदमप्यभिमतमस्ति यन् मन्त्राः मननात्त्रायन्तेइति। 7 अर्थात् सर्वदा सर्वथा च मन्त्राणामुपयोगो रक्षार्थमेव भवति। रोगेभ्यः आत्मरक्षार्थं-मन्त्राणामुपयोगस्यौचित्यं लक्ष्यीकृत्यैव पुराणेषुमन्त्र-चिकित्साया उल्लेखा उपलभ्यन्ते।

मन्त्राणां प्रभावो द्विधा भवति। सस्वरसमुच्चरितो-नादरूपो वेदध्वनिः बाह्यप्रकृतेर्विकारानपाकरोति एव-मेव मनसि उपांशुरूपेण सर स्वरंसमुच्चरितोवेदध्वनिः अन्तः प्रकृतेर्विकारानपाकरोति।8 अत्रेदमपि वक्तुं शक्यते यत् शरीरस्थधातूनां यदपि क्रियान्वयनंभवतितत्सर्वं मनस एवायत्तंभवति। यदा मनोदौर्बल्येन ग्रस्तां नास्ति स कदाचिद् रुग्णोऽपि स्वास्थ्यलाभं प्राप्नोति। अतः मनस् तत्त्वमेव-चिकित्सार्थंचिन्तनीयमस्तीति वैदिका मन्यन्ते।9

वेदेषु शिवसंकल्पसूक्तादौ 'तन्मे मनः शिवसंकल्प-मस्तु' इत्यादि या भावनाऽभिव्यक्ता सा वस्तुतः चिकित्सामूले विद्यमानस्यास्य रहस्यस्यैव स्फुटतमाऽभिरव्यक्तिः। अतएव वेदे यत्रापि स्वास्थ्योपलाभाय चिन्तनं विहितं तत्र पंचमहा-भूतानामुपयोगपूर्वकं मनस एव केन्द्रीकरण-मुपायत्वेन प्रतिपादितम्। 'अपदेव्या' मन्त्रोच्चारणपूर्वकं-जलस्य विविधप्रयोगै रोगविशेषापहारस्योल्लेखाअनेकत्र वेदेषु प्राप्यन्ते। 10 एवमेववायोर्मन्त्रोच्चारणेन सहप्राणायाम-विशेषाणामुपयोगस्योल्लेखाअपि वेदविज्ञानेउपलभ्यन्ते।

वेदविद्यायामूलाधारत्वेन प्रणवोपासना विद्वद्भिरद्या-पिविधीयते एवमेव गायत्र्युपासना प्रचलिताऽस्ति। अथर्ववेदे तु इदमुक्तं यत् सर्वेदेवाः पिण्डे ब्रह्माण्डे चोभयत्र वर्तन्ते- ''यस्य त्रयस्त्रिंशद्देवाअंगे सर्वे समाहिताः।'' 11 देवानां संस्थितेरेव पिण्डब्रह्माण्डयो-रुभयोरस्तित्वमस्ति। खगोलीयपिण्डानां प्रभावैः पार्थिवपिण्डस्थदेवानांविचलनादेव रोगादयः प्रादुर्भवन्ति। यदि ब्रह्माण्डस्थ-देवानां शक्तिः पार्थिव-पिण्डेषु विद्यमानानां देवानां विचलनमवरुणद्धि तदा रोगावरोधोऽवश्यं स्यात्। अतएव वेदमन्त्रा एव तादृश शक्तिमन्तः सन्ति यत्ते ब्रह्माण्डस्थदेवशक्तिं प्रबलीकर्त्तु शक्नुवन्ति।

वेदमन्त्राणां चिकित्साक्षेत्रे उपयोगाय प्रयोक्तुः सात्त्विकी वृत्तिः, पावित्र्यं, शुद्धोच्चारणं, मन्त्राणां ऋषिच्छन्दोदेवतानांपरिज्ञानं, जपादिविधिषुपाटवं, यज्ञप्रक्रियायाः सम्यग्ज्ञानं चेतिसर्वे अपेक्ष्यन्ते। नैभिर्वि-ना कश्चिदपि प्रयोक्ता क्षेत्रेऽस्मिन् सफलीभवितुमर्हति। वेदाः स्वयमेव प्रतिपादयन्ति यद् देवाः जाग्रतमेव जीवनं-कामयन्ते। अतस्ते प्रमादं न वाञ्छन्ति। यथोक्तमृग्वेदे-

**''इच्छन्ति देवाः सुन्वन्तं न स्पप्नाय स्पृहयन्ति।**
**यन्तिप्रमादमतन्द्राः।। ''** 12

देवानां पुनरिदमपि वैशिष्ट्यं दर्शित यत्ते यज्ञकामाः सन्ति। यज्ञरूपिणः कर्मणः फलदानं तदायत्तमेव। तन्माध्यमेन जीवनदानं तु तैः संकल्पितमेव। यथोक्तं ऋग्वेदे यजुर्वेदे चापि-

**''देवानां भद्रासुमतिर्ऋजूयतां देवानां**
**रातिरभिनो नि वर्त्तताम्।**
**देवानां सख्यमुपसेदिमा वयं देवा न**
**आयुः प्रतिरन्तु जीवसे।।''** 13

सन्दर्भः-

1. गुप्तिज्किद्भ्यः सन्, अजाद्यतष्टाप् (पाणिनीयाष्टा-ध्यायी) 2. सुश्रुतसंहितामल्लारिकृत टीका/पृ. 68, 3. सुश्रुतसंहिता/पृ. 34, 4. सुश्रुतसंहितामल्लारिकृत टीका/पृ. 133, 5. वेदविज्ञानामृतम्/पृ. 219, 6. वेदविज्ञानामृतम्/ पृ. 222, 7. वैदिकन्त्रविज्ञान/पृ. 3, 8. वैदिकन्त्रविज्ञान/ पृ. 16, 9. स्वास्थ्यप्रदीप/पृ. 36-37, 10. स्वास्थ्यप्रदीप/ पृ. 47, 11. अथर्ववेद/ 10/ 7, 12. ऋग्वेद/8/2/18, 13. ऋग्वेद/2/89/2, यजुर्वेद/25/15

**शोधच्छात्रः,**
**संस्कृतविभागः,**
**राजस्थानविश्वविद्यालय, जयपुरम्**

# दिल्ली संस्कृत अकादमी, दिल्ली सरकार

**प्लाट सं. 5, झण्डेवालान, करोल बाग, नई दिल्ली-110005**
**दूरभाष: 23635592, 23681835**


## आवश्यक सूचना

### अखिल भारतीय मौलिक संस्कृत लघु कथा एवं लघु नाटक लेखन-प्रतियोगिता

**( वर्ष 2017-18 )**

दिल्ली संस्कृत अकादमी, दिल्ली सरकार द्वारा अखिल भारतीय स्तर पर संस्कृत विद्वानों एवं विदुषियों से संस्कृत भाषा में मौलिक रूप से लिखित संस्कृत लघु कथा एवं लघु नाटक लेखन प्रतियोगिता हेतु प्रवष्टियां आमन्त्रित की जाती हैं। जिसमें रु. 3000/-, रु. 2500/-, रु 2000/-, रु 1500/-, रु. 1200/-, रु.1000/-, रु. 600/-, एवं रु. 500/- के क्रमशः आठ पुरस्कार होंगे। इनके अतिरिक्त रु. 400/- के छः प्रोत्साहन पुरस्कार दि जायेंगे।

प्रतिभागी लेखकन निम्नलिखित दिशा निर्देशों को दृष्टि में रखकर ही अपनी रचना भेजें :-

1. लघु कथा एवं लघु नाटक स्वयं की मौलिक रचना होनी चाहिए। जिससे सम्बंधित स्वहस्ताक्षरित घोषणा पत्र संलग्न करना आवश्यक है।
2. संस्कृत लघु कथा एवं लघु नाटक ए-4 आकार के कम से कम 4 पृष्ठों एवं अधिक 5 पृष्ठों में तथा 14 फोण्ट साईज में टंकित रूप से होना चाहिए।
3. लघु कथा एवं लघु नाटक का कोइ भी अंश राष्ट्र विरोधी तथा व्यक्तिगत आक्षेप युक्त नहीं होना चाहिए।
4. लघु कथा एवं लघु नाटक बालोपयोगी तथा शिक्षाप्रद होनी चाहिए।
5. लघु कथा एवं लघु नाटक की मौलिक रचनाएं ईमेल अथवा डाक द्वारा दिनांक 30.09.2017 तक अकादमी कार्यालय में प्राप्त होनी चाहिए।
6. लेखकों द्वारा लघु कथा एवं लघु नाटकों के लिए लेख अलग-अलग भेजा जायेगा।

अधिक जानकारी के लिए अकादमी की वेब साईट www.sanskritacademy.delhi.gov.in पर देखें।

Facebook : www.facebook.com/delhisanskritacademy
Email : delhisanskritacademy@gmail.com

हस्ताक्षर
**( डॉ जीतराम भट्ट )**
सचिव

❑ आचार्यः दीपकशर्मा

# वैद्यशंकरलालशर्मणः साहित्यिककृतीनां काव्यदृष्ट्या विवेचनम्

परिगतशक्त्यात्मभुवा परमात्मना विरचितायां नामरूपात्मिक्यामस्यां सृष्टौ प्राक्तनपुण्यशालिनो विरला एव मानवा भवन्ति भाजनानि अक्षय्यकवियशसाम् ये खलु सुचिरसंचितपुण्यातिशयबलाद् नियतिकृतनियमरहितां ह्लादैकमयीमनन्यपरतन्त्रां नवरसरुचिरां कविसृष्टिं विदधति। ललितोचितपदविन्यासेन रमणीयार्थप्रवतिपादनपुरा यदीया कवितामयी सृष्टिर्नीरसान् सरसान् रूक्षान् कोमलान् निर्गुणान् जडान् ज्ञानिनो मूकान् वाक्पटून् कुरूपान् रूपवतश्च विदधाति। अत एव कविरपर प्रजापतिरित्युच्यते। तथा हि-

**अपारे काव्यसंसारे कविरेकः प्रजापतिः।**
**यथास्मै रोचते विश्वं तथेदं परिवर्तते।।**

सेयं कविपरम्परा अनादिकालादेव प्रर्वतमाना दृश्यते। तस्यामेव प्रशस्यकविपरम्परायां तत्रभवान् वैद्यशंकरलालशर्ममहोदयः सादरं स्मर्यते। अस्य जन्म रामेश्वरलालशर्मणः गृहे हरियाणाप्रदेशे नारनोलक्षेत्रे धौलेडा ग्रामे 1919 ईसवीयाब्दे जनवरीमासे 14 दिनांके अभूत्। भवतां शिक्षा पिलानी-जयपुर-बीकानेरनगरेषु सम्पन्नाऽभूत्। स हि भिषगाचार्यः आयुर्वेदाचार्यः साहित्याचार्यः आयुर्वेदभूषणः भिषग्रत्नं भिषक्-शिरोमणिश्चेति विविधोपाधीन् लब्धवान्। अध्ययनान्नतरं स्वातन्त्र्यात् पूर्वमेव भवान् फतेहपुरनगरम् आगत्य इदमेव नगरं स्वकर्मभूमिं व्यदधात्। भवान् फतेहपुरस्थसेठ-गोरखरामरामप्रतापचमडियासंस्कृतमहाविद्यालये 1967 ईशाब्दं यावत् प्राचार्यपदम् अलंकृतवान्। ततश्च चमडिया-दातव्ये औषधालये यावज्जीवं प्रधान-चिकित्सकपदम् अलंकृतवान्। एवं च प्रथमाचार्य-पदमलंकृत्य सहस्रशः शिक्षार्थिनः लाभान्वितान् व्यदधात् ततश्च प्रौढे वयसि रुग्जालजीर्णान् दीनान् हीनान् रोगिणः संजीवनौषधिभिः नीरोगान् व्यदधात्। वैद्यमहोदयः साहित्यरसरसिकोऽपि प्रकृत्याऽतितरां विनम्रः आसीत्। तदुक्तम् ऋतुविहारे -

**''नाहं गुणी न च कवी रसशास्त्रवेत्ता,**
**नालंकृतिं हृदयमोदकरीं न जाने।**
**श्लोकास्तथापि रचिताः कतिचिच्छ्रमेण,**
**प्रेक्ष्य श्रमं हृदि मुदोऽनुभवन्तु सन्तः।। 34।।''**

नित्यं विष्णुसहस्रनामपाठपरायणो भवान् निज-निर्मलकविप्रतिभया लोकोपकारि सन्मार्गदर्शकं विपुलं साहित्यं विरचितवान्। एवं त्रिविधसेवाभिः भवान् स्वीयं जीवनं लोककल्याणाय समर्पितवान्। लोकान् अपि परोपकाराय प्रेरयन् भवान् वार्ताप्रसंगे भागवतपुराणोक्तं पद्यमिदमुदाहरति।

तथाहि -

**एतावज्जन्मसाफल्यं देहिनामिह देहिषु।**
**प्राणैरथ धिया वाचा श्रेय एवाचरेत् सदा।।**

जङ्गमतीर्थीभूतः अयं महामनाः स्वीयैः प्रशस्तैः कर्मभिः बहुभिः सामाजिकसंघटनैः राज्यसर्वकारेण चानेकशः समादृतोऽभूत्।

**एतदीयाः रचनाः -**

वैद्यशंकरलालशर्मणः कृतित्वं वैविध्यपूर्णमस्ति। तत्र ऋतुविहारः श्रीमद्बुधगिरिचरितं चेति खण्ड-काव्यद्वयमस्ति। श्रीमदमृतचरितमहाकाव्यमेकमुदात्तं महाकाव्यमस्ति। शशिप्रभा इत्यभिधमेकं गद्यात्मकं काव्यमस्ति। श्रीमदमृतनाथचरितमहाकाव्यस्य भूमिकातो ज्ञायते यद् मदीया कर्मभूमिरिति निबन्धात्मकं काव्यमप्यनेन लिखितमासीत् परं तदधुना नोपलभ्यते एतत् श्रूयते यदस्य पाण्डुलिपिं प्रकाशनाय लेखकः कस्मैचिज्जनाय दत्तवान्, परं तस्याः पाण्डुलिप्याः किमभवदिति न सम्यग्ज्ञायते। महाकविनानेन हिन्द्यामपि आरोग्यसोपाननामकम् आयुर्वेदशास्त्रीयं विंशति-सोपानात्मकं बृहदाकारं गद्यात्मकं काव्यं विरचितमस्ति। चरक-सुश्रुत-वाग्भटादीनां ग्रन्थरत्नानां सारभूतमिदं काव्यं वैद्यमहाभागस्य आयुर्वेदशास्त्रीयं गूढं ज्ञानमस्माकं पुरस्तात् प्रस्तौति। मया एतदीयं संस्कृते विरचितं साहित्यिकरचनाचतुष्टयमवलम्ब्य विवेचनं विधास्यते। तथाहि-

**1. ऋतु विहार: -**

इदमेकं खण्डकाव्यमस्ति। यत्र ऋतूनां स्वरूप-वर्णनपुरस्सरं तच्चर्या विशदतया वर्णिता अस्ति। संस्कृत-साहित्ये उद्दीपनविभावत्वेन ऋतुवर्णनस्यैका परम्परैव चिरात् प्रचलिता दृश्यते। प्राय: महाकाव्येषु नाटकेषु गद्यकाव्येषु बहुलतया ऋतुवर्णनं विधीयमानं दृश्यते, परं तत्र कस्मिन् ऋतौ जनसमाजेन जीवनचर्या कथमिव परिचालनीयेति नांशतोऽपि सूच्यते। किन्तु मानव: स्वस्थो भूयादिति कामनया विरचितेऽस्मिन् खण्डकाव्ये ऋतुवर्णनेन सह वसन्तर्तोरारभ्य हेमन्तं यावत् मानव: कथं वर्तेत? किमश्नीयात्? चेति विशदं वर्णितमस्ति। ऋतुचर्यावर्णनेन समं अस्मिन् काव्ये एतदीयं प्रसादमाधुर्यगुणोपेतं सालंकारं च कवित्वकौशलं प्रतिपदं हठादेव आवर्जयति सचेतसां चेतांसि। काव्यस्यास्य प्रस्तावना देवर्षिभट्टमथुरानाथशास्त्रिणा लिखिता विद्यते, तया अस्य महत्त्वं व्यक्तं भवति।

**2. श्रीमद्बुधगिरिचरितम्-**

श्रीमद्बुधगिरिचरितमेकं खण्डकाव्यमस्ति। यत्र हि शतकत्रये तपोनिधे: श्रीमतो बुधगिरे: पावनं चरित्रं वर्णितं विद्यते। तपोनिधि: स्वामी बुधगिरि: राजस्थानप्रान्तीयेषु तेषु साधुषु सादरं गण्यते, ये स्वत्यागमयेन जीवनेन लोकान् प्रेरितवन्त:। 1827 तमे वैक्रमाब्दे झुंझनूनगरसमीपे एकस्मिन् ग्रामे धाबाई जातौ (गुर्जरजातौ) जनिं प्राप्य महात्मा बुधगिरि: स्वीयेन पावनेन आचरणेन किं वा पवित्रसाधनया बहून् लोकान् उपाकरोत्। रामगढ-फतेहपुरादिनगरेषु अद्यापि बहव: तदनुयायिनो भक्ता: दृश्यन्ते। 1862 तमे वैक्रामाब्देऽयं महात्मा जीवन् समाधिं गृहीतवान्। **देवर्षि डा. कलानाथशास्त्रिणा** अस्य भूमिकालेखनं कृतमस्ति।

**3. शशिप्रभा -**

शशिप्रभा गद्यात्मकं काव्यमस्ति। उपन्यासशैल्यां विरचितमिदं काव्यमतीव सरसं प्रसादमाधुर्यगुणोपेतं चास्ति। कथाव्याजेन कविना अत्र भारतीयसंस्कृते: दिव्यं स्वरूपं प्रकटीकृतम्। काव्येऽस्मिन् श्रेष्ठिवर: कृपासागर: नायक: तद्धर्मपत्नी शशिप्रभा च नायिका अस्ति। अत्र तयो: दम्पत्यो: कथाव्याजेन एकस्य सद्गृहस्थस्य अनुकरणीयं चरितं प्रस्तुतमस्ति। कादम्बरी-वासवदत्ताकथावत् अत्र नायिकाया: शशिप्रभाया: नाम्ना नामकरणं कृतम्। नामकरणविषये कवि: स्वयं लिखति यत्-अस्या रचनाया: ''शशिप्रभा'' नामविधाने रहस्यमिदमस्ति यदियं द्वितीयंपुरुषपात्रस्य रवेर्जननी। भारतीयसंस्कृतौ ''जननी जन्मभूमिश्च स्वर्गादपि गरीयसी'' इत्युक्त्या जनन्या: विपुलं महत्वम् अस्ति। किंच सन्ततीनां जनने पालने पोषणे च विपुलानि कष्टानि प्रसवित्री एव विषहते न तु जनक:।''यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवता:'' इत्युक्त्या योषितां विशिष्टं महत्त्वं पतिपादयितुमपि अस्या: रचनाया: नाम ''शशिप्रभा'' इति कृतम्।

**4. श्रीमदमृतचरित्रमहाकाव्यम् -**

''श्रीमदमृतचरित्रमहाकाव्यम्'' अतीव प्रसिद्ध-मस्ति। त्रयोदशस्तबकात्मकेऽस्मिन् महाकाव्ये अष्ट-त्रिंशदधिकैकसहस्रमिता: श्लोका: विद्यन्ते। अत्र संस्कृत-संस्कृतात्मन: भारतीयसंस्कृतिसेविन: यमनियमा-दिसम्पन्नस्य वीतरागिण: योगिन: अमृतनाथस्य दिव्या: गुणा: तेषाम् अलौकिका: चमत्काराश्च वर्णिता: सन्ति। महात्मन: अमृतनाथस्य जन्म 1909 तमे वैक्रमाब्देऽभूत्। अस्य पितु: नाम चेतनाराम आसीत्। जन्मकाले एवायं आजानुबाहु आसीत्। अस्य जन्मनि सर्वाणि शुभशकुनानि अभूवन्। एतदीयशरीरशोभां दीर्घललाटं विस्तृतं वक्षश्च वीक्ष्य जन्मर्क्षयोगं च विविच्य ज्योतिर्विदो न्यगादिषु: यदयं प्राप्ते काले योगिवरो भवेदिति। अस्य जन्मनाम यशोराम इत्यासीत्। जनिं प्राप्य बालोऽयं शुक्लेन्दुवद् वृद्धिं प्राप्नोत्। षाण्मासिकोऽप्ययं वर्षद्वयसम: प्रतीतिम् उपागच्छत्। शरीरवृद्ध्या कान्त्या चायं समवयस्कान् बालकान् अत्यशेत। यदायं त्रिवर्षदेशीयोऽभूत् तदा भ्रमन् आगत: कश्चन साधु: अवादीत्- **''भो यशराम ! जाटकुलसमुद्भव ! मम वचनं शृणु - अधुना तव अज्ञानं नष्टं, ज्ञानकपाटौ च अनावृतौ।''** एवंविधाभि: बहुभि: घटनाभि: बाल्य एवास्य विलक्षणता प्रकटिता अभूत्। बाल्यादनन्तरं प्राप्ते यौवने जननी एनं न्यगादीत्- **''वत्स ! विवाहकालो भवत:! अहं वधूम् इच्छामि।**

**तदा भवान् अवदत्। भवती सम्यक् कथयति, परमहं तु दुर्लभं नृदेहं लब्ध्वा ईश्वरं भजिष्यामि। अहं तादृशं कर्म करिष्ये, येन चिरकालं धरण्यां यशः प्रचरिष्यति।''** ततश्च शनैः शनैः अस्य मनसि वैराग्यं वृद्धिं प्राप्नोत्। असौ परिवारेण सह उदासरग्रामं प्राप। असौ तत्रापि एकान्तवासी अभूत्। ततः मातुः मृत्योरनन्तरं पितरं निवेद्य असौ गृहात् वव्राज। गुरोरन्वेषणे भूमौ भ्रमन् भवान् वारबासग्रामे श्रीचम्पानाथं गुरुं प्राप्य ततो नाथसम्प्रदाये दीक्षितोऽभूत् अमृतनाथसंज्ञां चालभत। ततश्चात्र महाकाव्ये योगिवर्यस्य अमृतनाथस्य सुदुर्लभं तपश्चरणादिकं च विशदतया वर्णितमस्ति। तच्चेदं सर्वंशोधग्रन्थे विवेच्यतां यास्यति। अत्र महाकाव्ये सुलभाः गुणालंकाररीतयोऽतीव रुचिरतया विलसन्ति। भावानां प्रस्तुतिः अतीव सरला प्रसादमाधुर्यगुणोपेता अस्ति। महाकाव्येऽस्मिन् वैराग्यमूलकानां भावानां तादृशी प्रस्तुतिरस्ति यया सभ्यानां हठादेव प्रतिपदं शान्तरसानुभूतिर्भवति। कविरत्र विशेषतः **''लोकाः अमृत-नाथमहात्मनःगुणान् आचरन्तु''**इत्युपदिशति।

एवं वैद्यशंकरलालशर्मणः विपुलं साहित्यमस्ति तच्च नाद्यापि प्रकाश्यतामुपगतम्। अधुना महाकवेरस्य कवित्वप्रतिभासंसूचकानि कानिचिद् उदाहरणानि प्रस्तूयन्ते। तथाहि-ऋतुराजवसन्तं वर्णयन् ऋतुविहारे कविवरः कथयति-

**शिशिरकालजशीतविशेषतां, पहिरहरन्नृतुराजमधुः प्रियः।**
**अवनिमण्डलमण्डितसौरभो, जयतु मानवमानसमानदः।। 8।।**

यद्वा-

**न च हिमन्न तुषारचयो मधौ, न हि पयोदकुलैर्वियदावृतम्।**
**न च चलन्ति हि पश्चिमवायवो,**
**गतमलाः ककुभो विलसन्त्यतः।। 16।।**

ग्रीष्मर्तुं वर्णयन् आह -

**धातस्तवायं महिमा विचित्रो, यत् पुष्पकाले भुवि सर्वदिक्षु।**
**विस्तार्य सौन्दर्यसुगन्धिते च, ग्रीष्मे पुनर्नाशयसि प्रसह्य।। 11।।**

वर्षर्तुं वर्णयन् आह-

**शुष्का मही प्रावृषि वृष्टियोगात्, प्रत्यग्रशष्पैर्मृदुभिश्च युक्ता।**
**तथेन्द्रगोपाः परितश्चरन्ति, प्रगृह्य पाणौ शिशवः प्रसन्नाः।।12।।**

वर्षर्तौ कीदृगन्नादिकं हितायेत्याह -

**यदुष्णमग्निं कुरुते च दीप्तमस्निग्धरूक्षं द्रवहीनमत्र।**
**अन्नं हितं कूपजलञ्च दिव्यं शृतञ्चशीतं मधुसंयुतञ्च।। 36।।**

शारदीं सुषमां वर्णयन् आह-

**तरणिरेति यदा तुलवृश्चिकौ धरणिरेति शरन्नवसम्पदः।**
**विपणिरेति नवम्वरधान्यकं, सरणिरेति मनुष्यगतागतम्।। 01।।**

हेमन्तर्तुं वर्णयन् आह -

**हिमानिलेनोपलकैश्च वृष्ट्याशीतप्रकर्षो दिवसेऽपि तस्मात्।**
**सुखैषिभिः पौरजनैः स्वगेहं, न मुच्यते शीतभयादिदानीम्।। 10।।**

बुधगिरिचरिते योगिवर्यं बुधगिरिं वर्णयति-

**सम्मान्योऽसौ तेजसा सूर्यरश्मिः,**
**साम्यं बिभ्रच्चन्द्रवत् शीतलात्मा।**
**शान्तो दान्तो रागनिमुक्तचेताः,**
**कोऽभूदन्यो मानवो वै धरित्र्याम्।। 3/78।।**

बुधगिरेः स्तवनं यथा -

**''मनोजमानमर्दकं, रजस्तमोऽपहारकम्''**
**गुरोः निदेशकारकं, भवाब्धिपारयापकम्।। 3/16।।**

महाकविरयं मध्ये मध्ये प्रसंगम् उपस्थाप्य लोकान् उपदिशति। तथाहि-

**मनुजवपुरिदं क्ष्माभूषणं श्रेष्ठमास्ते,**
**सकलगुणगुणाढ्यं दृश्यते कर्मसक्तः।**
**न हि किमपि कदाचिद् श्रेयसेऽनुष्ठितं वै,**
**मरणमुपगतस्य व्यर्थमेव प्रयासः।। 1/22।।**

मानवः स्वकृतस्य शुभाशुभकर्मणः फलं भुङ्क्ते। तदाह-

**कृतशुभाशुभकर्मफलं जनै-रिह जनिं समवाप्य च भुज्यते।**
**मम च पूर्वकृतस्य कुकर्मणः,**
**फलमिदं जननाथ ! भवत्वलम्।। 3/42।।**

एवं ''शशिप्रभा'' गद्यकाव्ये कवेरस्य गद्यसौष्ठवं दर्शनीयं विद्यते। तथाहि-

प्रभातकालं वर्णयन् आह -

**''क्षपा क्षपिता। प्राचि भगवान् दिवाकरः दिवा श्रमजां परिश्रान्तिं विधूय प्रहसन् कमलवनानि समुद्घाटयन्, चक्रवाकवधूवियोगं दूरीकुर्वन् कौशिकं भूधरकन्दरासु स्वापयन् उदयगिरिमध्यतिष्ठत्।''**

श्रीनगरं वर्णयन् आह -

**''श्रीनगरं श्रियाः नगरमिव रमणीयम्। नगरमिदं वितस्तासरित उभयोस्तटयोः स्थितं परमां शोभामावहति। दारुनिर्मितोच्चावचानि गृहतलानि नीलरक्तवलक्षराग-रंजितानि धर्म्याणि, विस्तृताः राजमार्गाः ..........।''**

**''विभावर्य्यां चापलैः प्रदीपैः नगरस्य सुषमा**
**वासपुरीमप्यतिशेते।''**

प्रभातं वर्णयन् आह-

**''भगवान् पतंगः प्रखरवैश्वानरसन्तापितायोगोलकवत् शोणितीभूतविग्रहः स्वशोणिम्ना प्राचीदिग्वधूं गगनमण्डलञ्च रञ्जयन् बलाहकसपत्नेषु प्रकुपित इव समुपपद्यते।।''**

कलिकालं वर्णयन् आह -

**''अहो ! अस्मिन् कलौ मानवाः भक्तिज्ञानवैराग्यरहिताः सन्तः केवलमुदरम्भरयः संजाताः न च ते कदाचिदपि विचारयन्ति स्वमनसि यद् वयमपि मरिष्यामोऽपितु.......... ।''**

श्रीमत् अमृतनाथचरितं महाकाव्यं तु कवेरस्य प्रतिभायाः सर्वोत्कृष्टं निदर्शनं विद्यते। कविनाऽत्र श्रीमतोऽमृतनाथमहात्मनः चरितवर्णनव्याजेन भारतीय-संस्कृतेः दिव्यं स्वरूपं वर्णितमस्ति।

अत्र प्रतिपदं सदाचारस्य, त्यागस्य, अभयस्य, दानस्य, दमस्य, यज्ञस्य, स्वाध्यायस्य, तपसः, आर्जवस्य, अहिंसायाः, सत्यस्य, अक्रोधस्य, शान्तेः, र्निलोभस्य, मृदुतायाः, अचापलस्य, तेजसः, क्षमायाः, धृतेः, शौचस्य अद्रोहस्य च वर्णनं विद्यते। योगिराजः त्यागं वर्णयति-

**नृपः कदाचित् तव सन्निकर्षे ग्रामस्य पट्टं परिगृह्य चायात्।**
**निधाय तत्ते चरणोपरि त्वामचष्ट गृह्णातु भवान् प्रपन्नम्।।8/47।।**
**गृह्णामि नेदं पृथिवी समग्रा, ममास्ति यत्र क्व च यामि राजन्।**
**स्थानं मिलेद् वै ह्युपवेष्टुमस्यां, पुनः किमर्थंच वहामि भारम्।।8/49।।**

अन्यानि कानिचित् पद्यानि यथा श्रीमदमृतचरित्रमहा-काव्ये-

**ईश्वर एक एवास्ति नामानि तु बहून्यपि।**
**यस्य यन्नाम्नि वै श्रद्धा तन्नाम्ना स भजेत तम्।। 13/01।।**
**अधुना तु कलौ प्रायः नास्तिक्यवृत्तिमाश्रिताः।**
**न विश्वसन्ति शास्त्रेषु मनुष्याः स्वार्थतत्पराः।। 13/06।।**

मानवः सदा प्रसन्नचेताः भवेदित्याह -

**मनसि प्रविचिन्त्य सर्वदा, बलवत्तां खलु दैवनिर्मिताम्।**
**भव मानव ! मानसे निजे सततं हृष्टमनाः न शोचतु।।10/30।।**

वैराग्यमूलकाः भावाः यथा-

**संसारोऽयं नास्ति नित्यस्तथाऽस्य**
**भोगाश्चापि स्थायिनो नैव सन्ति।**
**दाराः रायोमानवाः! शक्तिविद्यातेजोराज्यादीनि**
**सर्वाणि यानि।**
**अब्बुद्धै नैव नित्यास्ततश्च तेष्वासक्तो**
**जीवनं दुर्लभं नु।। 01/65।।**
**व्यत्येतीत्थं व्यर्थमेवेह चायुः**
**धीमद्भिश्चातो विचार्य स्वबुद्ध्या।**
**कालक्षेपन्नै भैव कुर्यात् कदाचिन्नो**
**चेद् भूयः जन्ममृत्योश्च चक्रम्।। 01/66।।**

एवमन्यदपि बहु विवेच्यमस्ति।

**शोधच्छात्रः - साहित्यविभागः, जरारासंविवि, जयपुरम्**


हार्दिक शुभकामनाओं सहित :-

निर्माता

# ए इन्फ्रास्ट्रक्चर लिमिटेड

## ए.सी. प्रेशर पाइप्स

तकनीकी रूप से सर्वोत्तम, पेयजल, कृषि, सीवरेज एवम् सेनिटेशन में उपयोगी
तथा धातु निर्मित पाइपों की अपेक्षा सस्ते और टिकाऊ
फाइबर सीमेंट की नालीदार चादरें

## छत्त एक, लाभ अनेक

हमीरगढ़ भीलवाड़ा - 311025 (राजस्थान) दूरभाषः 01482-286106/07
दिल्ली कार्यालयः ए-9, ग्रीन पार्क मैन, नई दिल्ली-110016 दूरभाषः- 011-26850488
जयपुर पाइप कार्यालय : 411, तीसरी मंजिल, शालीमार काम्प्लेक्स, चर्च रोड़, एम.आई.रोड़, जयपुर
फोनः 0141-2369691, 2370566, फैक्स : 0141-4019691
जयपुर चादरें कार्यालयः शोरूम नं. 2, फर्स्ट फ्लोर, नियर रिद्धी-सिद्धी स्वीट्स, लिंक रोड़, गोपालपुरा, जयपुर
फोन : 0141-3206915, फैक्सः- 0141-2763656

संस्कृतसमाचारः

# संस्कृतविद्वत्सम्मानसमारोहः-2017

निदेशालय-संस्कृतशिक्षाराजस्थानपक्षतः प्रतिवर्षमिव श्रावणमासस्य पूर्णिमातिथिमुपलक्ष्य राज्यस्तरीयसंस्कृत-दिवसान्तर्गतसंस्कृतविद्वत्सम्मान समारोहस्य आयोजनं 04-08-2017 दिनाङ्के जयपुरस्थे ''रवीन्द्र-मंच' इति स्थाने कृतम्। कार्यक्रमस्य प्रारम्भः सरस्वतीपूजनेन वैदिक-मङ्गलाचरणेन च कृतः। संस्कृतशिक्षायाः अतिरिक्तमुख्य-सचिवः श्रीमता राजहँस उपाध्यायमहोदयेन कार्यक्रमस्य प्रास्ताविकम् उपस्थाप्य सर्वेषां स्वागतञ्च कृतम्।

पुनश्च समारोहेऽस्मिन् संस्कृतभाषायाः प्रचार-प्रसाराभ्याम् उल्लेखनीयकार्याय संस्कृतविदुषां सम्माननं कृतम्। सम्माननक्रमे एकलक्षरूप्याकात्मकः ''संस्कृत-साधनाशिखरसम्मानः'' इत्यनेन परमपूज्यस्वामिनः श्रीगोविन्ददेवगिरिमहाराजाः सम्मानिताः। द्वितीयक्रमे एकपञ्चाशत् सहस्ररुप्याकात्मकः ''संस्कृतसाधनासम्मानः'' इत्यनेन पं. सत्यनारायणशास्त्रिणः श्रीकैलाशचन्द्रमून्दडा-महोदयाश्च सम्मानिताः। तृतीयक्रमे एकत्रिंशत्सहस्र-रुप्यात्मकः ''संस्कृतविद्वत्सम्मानः'' इत्यनेन डॉ. विक्रमजीतः, डॉ. सत्यप्रकाशदुबे, डॉ. अनीताजैन, डॉ. संदीपजोशी, डॉ. शम्भूनाथझा डॉ. हेमन्तकृष्णमिश्रश्च सम्मानिताः। चतुर्थक्रमे एकविंशति-सहस्ररुप्यात्मकः ''संस्कृतयुवप्रतिभा-पुरस्कारः'' इत्यनेन श्री उमेशद्विवेदी, डॉ. देवेन्द्रचतुर्वेदी, श्रीदुर्गाप्रसादशर्मा, श्रीलोकेशकुमारशर्मा श्रीसुमितशर्मा च पुरस्कृताः। एतेन सहैव प्रवेशिका-वरिष्ठोपाध्याय-शास्त्री-आचार्यपरीक्षासु सर्वोच्चाङ्कप्राप्त-कर्त्तारः विद्यार्थिनः अपि पुरस्कृताः।

अस्मिन् वर्षे संस्कृतशिक्षायां प्रथमवारं संस्कृत-विद्यालयेषु महाविद्यालयेषु च भौतिक-शैक्षिक-सहयोगाय विशेषसम्मानेन भामाशाहौ श्रीबजरंगलाल-तापडियामहोदयः श्रीनेमीचन्दतोषनीवालमहोदयश्च सम्मानितौ।

अवसरेऽस्मिन् संस्कृतशिक्षाविभागीया वार्षिकी पत्रिका ''**श्रावणी**'' तथा च उत्पीठिका-दिनदर्शिका (टेबल-कलैण्डर) इत्यस्यापि लोकार्पणम् अतिथिभिः कृतम्।

अवसरेऽस्मिन् सारस्वतातिथिरूपेण डॉ० जयादवे महोदयया उक्तं यत् सर्वैः संस्कृतानुरागिभिः संस्कृतस्य प्रचारः प्रसारश्च स्वीयं दायित्वं मत्वा योगदानं कर्त्तव्यम्। विशिष्टातिथिरूपेण संस्कृतविश्वविद्यालयस्य कुलपतयः प्रो.विनोदशास्त्रिणः उक्तवन्तः यत् संस्कृतभाषायाः प्रचार-प्रसारयोः संस्कृतविश्वविद्यालयः स्वकीयां महत्त्वपूर्णां भूमिकां निर्वहति। अत्र योगशास्त्रस्य विविधपाठ्यक्रमाणां समारम्भः सञ्जातः अस्ति। विद्वत्सम्मानसमारोहाध्यक्षेण श्रीमता वासुदेव देवनानी-महोदयेन (शिक्षाराज्यमन्त्रिणा) उक्तं यत् विज्ञानवाणीं संस्कृतभाषां जनवाणीं कर्त्तुमस्माभिः प्रयत्नः कर्त्तव्यः। अवसरेऽस्मिन् तेन संस्कृतशिक्षया सहैव सामान्य-शिक्षायाः संस्कृतविषये उत्कृष्टछात्राणां सम्मानेनापि प्रसन्नता प्रकटीकृता संस्कृतक्षेत्रे उद्योगसम्भावनासु स्वाभिमतं प्रकटीकृतं यत् संस्कृतस्य सुदिनानि सुनिश्चितानि सन्ति।

संस्कृतानुरागिभिः परिपूर्णपरिवेशे समारोहस्य मुख्यातिथिना संस्कृतशिक्षामन्त्रिणा माननीयकिरणमाहेश्वरी-महोदयया स्वीयोद्बोधने उक्तं यत् विगतवर्षेभ्यः लम्बित-प्रधानाचार्यपदानां पदोन्नतिः पदस्थापनञ्च सञ्जातमस्ति। पुनश्च वरिष्ठोपाध्यायविद्यालयानामन्यपदानां शीघ्रातिशीघ्रं पदपूर्तिः पदोन्नतिश्च भविष्यति। विभागे नवीनपदानां विज्ञप्तिविवरण-मपि प्रस्तुतम्। शिक्षामन्त्रिमहोदयया उक्तं यत् आगामिवर्षात् सर्वेऽपि सम्मानप्राप्तकर्त्तारः दातारश्च भारतीयपरिधानं धृत्वैव आगच्छेयुः।

अन्ते च संस्कृत-शिक्षाविभागस्य निदेशकेन श्रीमता विमलकुमारजैनमहोदयेन समारोहे आगतेभ्यः अतिथिभ्यः, सम्मानितविद्वद्भ्यः, पुरस्कृतशिक्षार्थिभ्यः, संस्थाभ्यः, मीडियाकर्मचारिभ्यः वित्तीयसहयोगदानार्थं राजस्थानराज्य-पाठ्यपुस्तकमण्डलाय च धन्यवादः ज्ञापितः तथा च विभिन्नकार्यक्रमेषु उल्लासपूर्वकं भागग्रहीतृभ्यः छात्रेभ्यः धन्यवादज्ञापनपुरस्सरं मंचस्थेभ्यः अतिथिभ्यः स्मृतिचिह्नं प्रदत्तम् एवं भविष्येऽपि सर्वेषां सहयोगस्यापेक्षा प्रकटीकृता। समारोहस्य समापनं राष्ट्र-गानेन सह सञ्जातम्।



संस्कृतदिवससमारोहान्तर्गतसंस्कृतविद्वत्सम्मानकार्यक्रमः ( 2017 ) इत्यवसरे सम्मानिताः विद्वांसः पुरस्कृताः युवप्रतिभावन्तः च मञ्चस्थैः अतिथिभिः सह।




संस्कृतविद्वत्सम्मानः - 2017 इत्यवसरे संस्कृतशिक्षाविभागीयवार्षिकपत्रिकायाः ''श्रावणी'' इत्यस्याः लोकार्पणं कुर्वन्तः अतिथयः ( वामतः क्रमशः ) श्रीविमलकुमारजैनः ( निदेशकः, संस्कृतशिक्षा ), प्रो. विनोदशास्त्री ( कुलपतिः, राजस्थान-संस्कृत-विश्वविद्यालयः,जयपुरम् ) श्रीमती किरणमाहेश्वरी ( मा.संस्कृतशिक्षामन्त्री, राजस्थानसर्वकारः ), श्रीवासुदेव देवनानी ( मा. शिक्षाराज्यमन्त्री, स्वतन्त्रप्रभारः ), डॉ. जयादवे ( अध्यक्षः, राज.संस्कृत-अकादमी ), श्रीराजहँस उपाध्यायः ( अतिरिक्तमुख्यसचिवः, संस्कृतशिक्षा ) तथा श्री अमितगोयल।



संस्कृतविद्वत्सम्मानः - 2017 इत्यवसरे ''उत्पीठिका-दिनदर्शिका'' इत्यस्य लोकार्पणं कुर्वन्तः मञ्चस्थाः अतिथयः।



संस्कृतविद्वत्सम्मानः -2017 ( रवीन्द्रमञ्चसभागारः, जयपुरम् ) इत्यवसरे समुपस्थिताः संस्कृतानुरागिणः।

नारी-स्तम्भः

# महिलाकल्याणकरी संस्था 'रूवा'

❑ डॉ. राजेश्वरी भट्ट

स्वाधीने भारते ''महिलासशक्तीकरणं'' इति योजना राष्ट्रस्य सम्मुखे विचारणीयासु योजनासु अग्रगण्या वर्तते। सप्तदशकेभ्यः सर्वकारः समाजः अन्याः संस्थाश्च नारी-समुन्नयनस्य कृते सततं प्रयासरता दृश्यन्ते। अस्मिन् क्रमे नारीणां सर्वतोमुखविकासाय अनवरतं संघर्षरतासु संस्थासु 1975 तमे वर्षे राजस्थानप्रदेशस्य राजधान्यां जयपुरनगर्यां संस्थापिता राजस्थानविश्वविद्यालय-महिला संस्था ( **RUWA** ) विशेषेणोल्लेखनीया प्रशंसनीया च वर्तते। राष्ट्रे नारीणां विषमस्थित्या खिन्नाभिः, नारी-हितचिन्तिकाभिः प्रबुद्धनारीभिः शोषितानां, पीडितानां, निरक्षराणां, आत्मनो मूलाधिकारेभ्यो वञ्चितानां महिलानां पुनः स्थापनायै 'रूवा' ( **RUWA** ) इति संस्थानस्य स्थापना कृता। स्थापनाकालादेव सततं आत्मनो लक्ष्यं प्रति अग्रेसरीयं संस्था महिलासशक्तीकरणस्य कृते बहुमुखी- योजनानां क्रियान्वयनेन यथासामर्थ्यं आन्दोलनेन, संघर्षेण च नारीजागरणं कृतवती '' संस्थायाः सशक्ताभिः सदस्याभिः यौतुकप्रथा, सतीप्रथा, भ्रूणहत्या, यौनोत्पीड़नादिभिः कुप्रथाभि-रुत्पीडितानां नारीणां समर्थने यथाकालं उग्रं प्रदर्शनं कृतम्। 1981 तमे वर्षे विश्वविद्यालयपरिसरे अनया महिलाहितकारिण्या 'रूवा' संस्थया शिक्षा-वञ्चितानां महिलानां कृते शिक्षामधिगन्तुं स्वतन्त्र-शिक्षाकेन्द्रस्य स्थापना कृता। अत्र अनेका नार्यः शिक्षासम्पन्ना जाताः। 1982 तमे वर्षे 'रूवा' संस्थाया जागरणशीलाभिर्नारीभिः वर्तमाने परिवेशे वैचारिकमतभेदेन परिवारेषु जायमानं विखण्डन-मवरोद्धुं पारिवारिकसम्बन्धान् पुनः संयोजयितुं 'परिवारपरामर्शकेन्द्रस्य' स्थापना कृता। ज्ञायते यत् केन्द्रस्यास्य प्रयासेन अनेके परिवाराः पुनः स्थापिता जाताः। 1985 तमे वर्षे 'शक्तिस्तम्भस्य' स्थापना '**RUWA**' ( रूवा ) संस्थाया निष्ठावतीनां नारीणां औदार्यस्य संवेदनशीलतायाश्च उत्कृष्टं उदाहरणं वर्तते। 'शक्तिस्तम्भ' केन्द्रे समाजे परिवारे च पीड़िताः प्रताड़िताः, शोषिता नार्यः तत्कालमेव शरणं प्राप्तुं शक्नुवन्ति। अस्याल्पावास-गृहस्य द्वाराणि शरणार्थिनीनां नारीणां कृते अहर्निशमुद्घाटितानि सन्ति। अस्मिन् अल्पावासगृहे आगत्य शरणञ्च प्राप्य पीड़िता नार्यः सुरक्षिता आत्मनोऽन्वभवन्। निरन्तरं सफलताया सोपानमतिक्रामन्ती **RUWA** ( रूवा ) संस्था केन्द्रीयसर्वकारस्य सहयोगेन राजस्थान-विश्वविद्यालयपरिसर एव विभिन्न कार्यक्षेत्रेषु कार्यं कुर्वतीनां महिलानां निवासाय महिला छात्रावासस्य स्थापनामकरोत् येन कार्यकरी महिला आश्वस्तभावेन कार्यस्थलं गन्तुं शक्नोति। अस्मिन् छात्रावासे उच्चशिक्षाकार्ये संलग्नानां महिलानां अपत्यानां सुरक्षायै शिशुनीड इति शिशुपालनगृहस्य व्यवस्था कृता। 2003 तमे वर्षे **RUWA** ( रूवा ) संस्थया विपद्ग्रस्तानां महिलानां बालिकानाञ्च सहयोगाय 'महिला हैल्पलाइन' इति 'सहायता-केन्द्रस्य' स्थापना कृता अत्र पीडिताभ्यः तत्कालमेव परामर्शो दीयते। एतदतिरिक्तं **RUWA** ( रूवा ) संस्था स्वसंचालितानां 'महिला सलाह एवं सुरक्षा केन्द्र', विधिप्रकोष्ठ, अकादमिक प्रकोष्ठादीनां शाखानां माध्यमेन महिलानां सर्वतोमुखीविकासाय प्रयतमाना दृश्यते। **RUWA** ( रूवा ) केन्द्रेण संचालिताभिरने-काभिर्नारीकल्याणकारीयोजनाभिः गतिविधिभिश्च आकृष्टा अनेकाः सन्नार्यः संस्थायाः सदस्यता-मधिगतवत्यः सहैव बह्वीभिः दानदातृभिर्नारी-भिर्धनेन, वस्त्रेरन्यैश्च उपयोगिनीभिः सामग्रीभिः यथासमयं, संस्थायाः सहयोगः क्रियते। निश्चयेन अद्य किं कृतं किं च श्वः करणीयमिति दृढ़मवधार्य महिला कल्याणमार्गे अग्रे गच्छन्ती **RUWA**

**( रूवा ) संस्था न केवलं राजस्थान प्रदेशे अपितु राष्ट्रेऽभिनन्दनीया संस्था वर्तते।**

**हिन्दी अनुवाद**

स्वाधीनभारत में 'महिलासशक्तीकरण' राष्ट्र के सम्मुख विचारणीय योजनाओं में महत्वपूर्ण है। सात दशकों से सरकार, समाज तथा अन्य संस्थाएँ 'नारी समुन्नयन' के लिए सतत प्रयासरत है। इसी क्रम में नारी के सर्वतोमुखी विकास के लिए अनवरत संघर्षरत संस्थाओं में सन् 1975 में राजस्थान प्रदेश की राजधानी जयपुर नगरी में संस्थापिता ''राजस्थान विश्वविद्यालय-महिलासंस्था'' RUWA (रूवा) विशेषरूप से उल्लेखनीया एवं प्रशंसनीय है। राष्ट्र में नारियों की विषम स्थिति से खिन्न, नारी हितचिन्तिका, प्रवुद्धनारियों द्वारा समाज में शोषिता पीड़िता, निरक्षरा, अपने मूलाधिकारों से वञ्चिता नारियों की पुनः स्थापना के लिए रूवा (RUWA)संस्था की स्थापना की गई। स्थापनाकाल से ही निरन्तर अपने लक्ष्य के प्रति अग्रसर यह संस्था ''महिलासशक्तीकरण'' के लिए बहुमुखी योजनाओं के क्रियान्वयन, तथा समय समय पर आन्दोलन एवं संघर्ष के माध्यम से नारीजागरण के लिए समर्पित है। रूवा (RUWA) संस्था की सशक्त सदस्याओं द्वारा, दहेजप्रथा, सतीप्रथा, भ्रूणहत्या, यौनउत्पीड़न आदि अनेक कुप्रथाओं से पीड़िता नारियों के समर्थन में समय समय पर उग्र प्रदर्शन किए गए। सन् 1981 में महिलाकल्याणचिन्तिका इस संस्था के द्वारा विद्यालयपरिसर में ही शिक्षा से वञ्चित महिलाओं के शिक्षाप्राप्त करने के लिए स्वतन्त्र शिक्षा केन्द्र की स्थापना की गई। जहाँ अनेक नारियों ने शिक्षा ग्रहण की है। सन् 1982 मे रूवा संस्था की प्रबुद्धनारियों के द्वारा वर्तमान परिवेश में वैचारिक मतभेद के कारण परिवारों में होने वाले विखण्डन को रोकने के लिए तथा पारिवारिक सम्बन्धों को पुनः मधुर बनाने के एि 'परिवारपरामर्श' केन्द्र की स्थापना की गई। परिवार परामर्श केन्द्र के सहयोग से अनेक परिवार पुनः स्थापित किए गए। सन् 1985 में ''शक्तिस्तम्भ'' केन्द्र की स्थापना RUWA (रूवा) संस्था की निष्ठावती नारियों के औदार्य एवं संवेदनशीलता का उत्कृष्ट उदाहरण हैं। शक्तिस्तम्भ केन्द्र में समाज तथा परिवार में पीड़ित, प्रताड़ित तथा शोषित नारियाँ तत्काल शरण प्राप्त करने में समर्थ हैं। इस अल्पावास गृह के द्वार शरण में आने वाली नारियों के लिए सदैव खुले हुए हैं। इस अल्पावास में शरण प्राप्त करने वाली नारियाँ अपने को सुरक्षित अनुभव करती है। निरन्तर सफलता के मार्ग पर अग्रसर (RUWA) रूवा संस्था एवं सरकार के सहयोग से 'राजस्थान विश्वविद्यालय' के परिसर में ही विभिन्न कार्यक्षेत्रों में कार्यरत महिलाओं के रहने के लिए महिला छात्रावास का निर्माण करवाया गया, जिससे कार्यरत महिलाएँ आश्वस्त भाव से कार्यस्थल पर जाने में समर्थ हों। इसी छात्रावास में उच्च शिक्षा कार्यो में संलग्न महिलाओं के बच्चों की सुरक्षा के लिए 'शिशुनीड़' नामक शिशुपालन केन्द्र की स्थापना की गई। सन् 2003 में RUWA 'रूवा' संस्था द्वारा आपत्तिग्रस्त महिलाओं एवं लड़कियों की सहायता के लिए 'महिला हैल्पलाइन' नामक सहायता केन्द्र की स्थापना की गई। यहाँ पीड़ित महिलाओं की तत्काल सहायता प्रदान की जाती है। इसके अतिरिक्त रूवा 'RUWA' संस्था स्वसंचालित ''महिला सलाह एवं सुरक्षाकेन्द्र'' विधिप्रकोष्ठ, अकादमिक प्रकोष्ठ आदि शाखाओं के माध्यम से, महिला दिवस के लिए प्रयत्नशील है। रूवा RUWA केन्द्र द्वारा संचालित अनेक कल्याणकारी योजनाओं एवं गतिविधियों से आकृष्ट अनेक सभारियों ने संस्था की सदस्यता ग्रहण की है साथ ही अनेक दानशील नारियों के द्वारा धन, वस्त्र, तथा अन्य उपयोगी वस्तुओं के द्वारा समय-समय पर संस्था का सहयोग किया जाता है। आज क्या किया है ? और कल क्या करना है ? इस बात को दृढ़ता से हृदय में धारण करके आगे बढ़ने वाली RUWA संस्था न केवल राजस्थान में अपितु राष्ट्र में अभिनन्दनीया है।

**-सी-276, भाभामार्ग, तिलकनगर, जयपुर**

आयुर्वेद-स्तम्भः

# एतत् साम्यस्य लक्षणम्

❑ प्रो. बनवारीलालगौडः
पूर्व-कुलपतिः

**आयुर्वेदमतानुसारेण पञ्चभूतात्मके ह्यस्मिन् देहे निरन्तरं किमपि किमपि क्षपण भवति। तेन शरीरस्थानां दोषधातुमलादीनां क्षयो भवति। क्षयस्यास्य पूर्त्यर्थं पञ्चभूतात्मकस्यैवाहारस्य ग्रहणं करोति जनः। सामान्यतया तु जनः देह-देशबल-कालादीन् विचिन्त्य सात्म्यानुरूपं मात्रात्मकम् आहारं गृह्णाति, तेन हि नियमितरूपेण तस्य शरीरे संस्थितानां दोषादीनां सम्यक् पूर्तिःभूत्वा तेषां साम्यापादनं भवति। कदाचित्तु केषाञ्चित्तत्त्वानां सम्यक् पूर्तिर्यदि न भवति, तदा तु तस्य शरीरे तस्य क्षयस्य प्रदर्शकानि लक्षणानि प्रादुर्भवन्ति। तानि तु दृष्ट्वानुभूयते यच्छरीरे तत्त्वविशेषस्य क्षपणं जातम्। शरीरं तु स्वयमेव तद्वर्धकानां द्रव्याणाामाकांक्षां करोति।**

आयुर्वेद के मतानुसार पञ्चभूतात्मक इस देह में निरन्तर कुछ न कुछ क्षपण (क्षय) होता रहता है। इस से शरीरस्थ दोष-धातु-मलादि का क्षय होता है। इस क्षय की पूर्ति के लिए व्यक्ति पञ्चभूतात्मक आहार का ही ग्रहण करता है। सामान्यतया तो देह देश, बल, काल आदि का विचार कर के सात्म्य के अनुरूप (कौन सी चीज उसे अनुकूल रहती है यह सोच कर) मात्रापूर्वक आहार लेता है। उस से नियमित रूप से उसके शरीर में स्थित दोषादि की सम्यक् पूर्ति होकर उनका साम्यस्वरूप में होना होता है। कभी किन्हीं तत्त्वों की सम्यक् पूर्ति यदि नहीं होती है तब तो उसके शरीर में उस क्षय को बताने वाले लक्षण उत्पन्न होते है। उनको तो देखकर अनुभव किया जाता है कि शरीर में तत्त्व विशेष का क्षय हो गया है। शरीर तो स्वयं ही उन तत्त्वों को बढाने वाले द्रव्यों की आकांक्षा करता है।

**प्रसङ्गेऽस्मिन्नाचार्यः सुश्रुतः कथयति यत्-**

**दोषधातुमलक्षीणो बलक्षीणोऽपि वा नरः।**
**स्वयोनिवर्धनं यत्तदन्नपानं प्रकांक्षति।।**

**(सु.सू. 15/29)**

**लौकिकेनोदाहरणेन वयं प्रत्यक्षमेवानुभवामः यद् यदा शरीरे येन केनापि कारणेन द्रवांशस्य क्षपणं भवति तदा जनः तृष्णामाध्यमेन द्रवस्याभिकांक्षां करोति। यदा च सः द्रवं प्राप्नोति (पिबति) तदा तस्य शरीरस्थस्य द्रवांशक्षयस्यापोहनं भवति। क्रमेऽस्मिन्नाचार्यः निर्दिशति यद् -**

**यद्यदाहारजातं तु क्षीणः प्रार्थयते नरः।**
**तस्य तस्य स लाभे तु तं तं क्षयमपोहति।।**

**(सु.सू. 15/30)**

इस प्रसङ्ग में आचार्य सुश्रुत कहते हैं कि जिसके दोष, धातु और मल क्षीण हो गए हैं ऐसा व्यक्ति अथवा जिसका बल क्षीण हो गया है ऐसा व्यक्ति उस दोषादि की मूलयोनि (मूल कारण हेतु) को बढाने वाला जो अन्न-पान है उसकी इच्छा करता है।

लौकिक उदाहरण से हम प्रत्यक्ष रूप से ही अनुभव करते हैं कि जब शरीर में जिस किसी भी कारण से द्रवांश का क्षय होता है तब व्यक्ति तृष्णा के माध्यम से द्रव की आकांक्षा करता है। और जब वह द्रव को प्राप्त करता है (पीता है) तब उसके शरीर में स्थित द्रवांश का क्षय दूर होता है। इस क्रम में आचार्य कहते हैं कि-

जिस-जिस आहार समूह को (आहार के तत्त्व विशेष को) क्षीण व्यक्ति चाहता है (इच्छा करता है) वह उस-उस को प्राप्त करने पर उस-उस क्षय को दूर कर लेता है।

**अत्रैतदपि ज्ञातव्यं वर्तते यत् शरीरे समुत्पन्नानि लक्षणानि द्विविधानि भवन्ति, स्वसंवेद्यानि साधारणानि भविन्त, येषामनुभूतिं जनः स्वयमेव करोति स्वयमेव च तेषां शमनमपि निश्चितं करोति। यथा हि बुभुक्षा यदा जायते तदा सः जनः आहारमभिकांक्षति। तृष्णायाः समुत्पत्तौ तु जलस्या-भिकांक्षां करोति। धर्मेण सन्तप्तः क्लान्तश्च जनः सन्तर्पणात्मकं मधुररससंयुक्तं शीतलं द्रवं पातुमिच्छति। तत्पानानन्तरञ्च तन्मूलकानां लक्षणानां शमनं भवति। एवमेव कदाचिच्छीतेनार्तो जनः उष्णद्रव्याणामाकाक्षां करोति, तल्लाभेन च स तन्मूलकं शान्तिं तथा तुष्टिमनुभवति। एवमेव शरीरे यदा येन केनापि कारणेन रूक्षता समुपजायते तदा तु जनः स्नेहमभिलषति, यदा स्नेहस्य प्राप्तिः शरीरे सम्यक्रूपेण भवति तदा जनः रूक्षताजनितानां लक्षणानामनुभूतिं न करोति।**

यहाँ यह भी जानने योग्य है कि शरीर में उत्पन्न लक्षण दो प्रकार के होते हैं – स्वसंवेद्य लक्षण और परसंवेद्य लक्षण। इन में स्वसंवेद्य लक्षण साधारण होते हैं, जिनकी अनुभूति व्यक्ति स्वयं ही करता है तथा स्वयं ही उनके शमन को भी निश्चित करता है। जैसे कि बुभुक्षा जब उत्पन्न होती है तब वह व्यक्ति आहार की इच्छा करता है। गर्म (ताप, गर्मी) से सन्तप्त और क्लान्त (थका हुआ) व्यक्ति सन्तर्पण करने वाले मधुर रसयुक्त शीतल द्रव पीने की इच्छा करता है। और उसके पीने के बाद तन्मूलक लक्षणों का शमन होता है। इसी तरह कभी शीत से पीडित व्यक्ति उष्ण द्रव्यों की इच्छा करता है, उनके प्राप्त कर लेने पर वह तन्मूलक शान्ति तथा तुष्टि का अनुभव करता है। इसी तरह शरीर में जब जिस किसी भी कारण से रूक्षता उत्पन्न हो जाती है तब तो व्यक्ति स्नेह की इच्छा करता है, जब स्नेह की प्राप्ति शरीर में ठीक तरह से हो जाती है तब व्यक्ति रूक्षता जनित लक्षणों की अनुभूति नहीं करता है।

**यदा च शरीरेऽभिष्यण्णाननगुदात्मिका स्थिति-र्भवति मन्दाग्निश्च जायते जनश्च स्नेहग्लानो भवति तदा सोऽनुभवति यच्छरीरे स्नेहाधिक्यं जातम्। अतः स रूक्षतामभिकांक्षति। इत्थं शरीरे बहूनि साधारणानि लक्षणानि भवन्ति यानि पीडितेन जनेन स्वयमेवा-नुभूयन्ते। एतानि स्वसंवेद्यानि लक्षणानि भवन्ति। किन्तु कानिचिल्लक्षणानि तु क्लिष्टस्वरूपात्मकानि भवन्ति तानि तु परसंवेद्यानि जानीयात्। यद्यपि जनः तान्यनुभवति किन्तु तेषां पूर्णतः सुनिश्चितीकरणं निवारणप्रक्रियां च विशेषज्ञ एव जानाति। एतेषां लक्षणानां समूहस्य ज्ञानं भवति निवारणमपि तदनुसार्येव। एतानि परसंवेद्यलक्षणानि भवन्ति। यानि तु शरीरस्थानां दोषाधात्वादीनां वृद्धिं क्षयञ्चापि संसूचयन्ति।**

जब शरीर में मुख और गुदा में अभिष्यन्दावस्था (स्राव, चिपचिपापन) की स्थिति होती है और मन्दाग्नि उत्पन्न हो जाती है तथा व्यक्ति स्नेह से ग्लानि करने वाला हो जाता है तब वह अनुभव करता है कि शरीर में स्नेह की अधिकता हो गई अतः वह रूक्षता की इच्छा करता है। इस प्रकार शरीर में बहुत से साधारण लक्षण उत्पन्न होते हैं जो कि पीडित व्यक्ति के द्वारा स्वयं ही अनुभव किए जाते हैं। ये स्वसंवेद्य लक्षण होते हैं। किन्तु कुछ लक्षण तो कठिन स्वरूप के होते हे उन्हें तो परसंवेद्य जाने। यद्यपि व्यक्ति उनका अनुभव करता है किन्तु उनको पूर्ण रूप से सुनिश्चित करने को तथा निवारण की प्रक्रिया को विशेषज्ञ ही जानता है। इन लक्षणों के समूह का ज्ञान निदानपञ्चक के माध्यम से ही होता है। वर्तमान काल में तो विभिन्न उपकरणों के द्वारा इन लक्षणों का रोग रूप से ज्ञान होता है और निरवारण भी उसके अनुसार ही होता है। ये परसंवेद्य

लक्षण होते हैं। जो कि शरीरस्थ दोष और धातुओं की वृद्धि और क्षय को संसूचित करते हैं।

**यो जनः दोषधातुमलादीनामभिवर्द्धक-द्रव्याणाम् ( अन्नपानौषधानाम् ) सेवनं करोति तस्य शरीरे दोषादीनां वर्धनेन विविधाः रोगाः जायन्ते। यश्च जनः दोषादीनां क्षपणकारकाणां द्रव्याणामुपसेवनं करोति तस्य शरीरे क्षपणात्मकानि लक्षणानि जायन्ते। तान्यपि च रोगात्मकान्येव सन्ति। आचार्यः चरकः स्पष्टयति, यत्-**

**दोषाः प्रवृद्धाः स्वं लिङ्गं दर्शयन्ति यथाबलम्।**
**क्षीणा जहति लिङ्गं स्वं, ......... ।।**

**( च.सू. 17/62 )**

**चक्रपाणिस्तु प्रसङ्गमेनं व्याख्यानयति, यत्-...... स्वं लिङ्गमिति वैकारिकम्। यथाबलमिति अतिवृद्धैरति वृद्धं, मध्यवृद्धैर्मध्यवृद्धमित्यादि। लिङ्गं स्वं जहतीत्यनेन क्षीणानां प्रकृतिलिङ्गक्षय-व्यतिरिक्तं विकारकर्तृत्वं नास्तीति दर्शयति, यतो वृद्धा उन्मार्गगामिनो दोषा दूष्यं दूषयन्तो ज्वरादीन् कुर्वन्ति न क्षीणाः स्वयमेव दुःस्थितत्वात्।**

**अनेनाचार्यद्वयेन स्पष्टं संकेतितं यत् सर्वदा शरीरे समत्वकारकाणां सात्म्यस्वरूपिणां द्रव्याणां सेवनं कर्तव्यम्। कथं सेवनं कर्तव्यमिति तु जनाः निरन्तरमभ्यासेन स्वयमेव जानन्ति तथा तज्ज्ञैरपि च दिनचर्या-ऋतुचर्या-आहारविधिविधानपरिपालन-माध्यमेन स्पष्टं निर्दिष्टम्। तत्तु तत्तत्प्रकरणेऽवलोक-नीयम्। सूत्ररूपेण त्वाचार्येण सुश्रुतेन यन्निर्दिष्टं तन्मननीयं परिपालनीयं च।**

जो व्यक्ति दोष, धातु और मलादि को बढाने वाले द्रव्यों (अन्न-पान एवं औषध) का सेवन करता है उसके शरीर में दोषादि के बढने से अनेक रोग उत्पन्न हो जाते है। और जो व्यक्ति दोषादि को क्षीण करने वाले द्रव्यों का सेवन करता है, उसके शरीर में क्षीणता के लक्षण उत्पन्न हो जाती हैं। वे भी रोग-स्वरूप के ही हैं। आचार्य चरक स्पष्ट करते हैं कि- बढ़े हुए दोष बल के अनुसार अपने लक्षण को प्रदर्शित करते हैं और क्षीण दोष अपने लक्षण को छोड़ देते हैं।

चक्रपाणि तो इस प्रसङ्ग की व्याख्या करते हुए कहते हैं कि - अपने लक्षण अर्थात् वैकारिक लक्षण ''यथाबलं'' अर्थात् अतिवृद्ध के द्वारा वृद्ध और मध्यवृद्ध के द्वारा मध्यवृद्ध इत्यादि। 'अपने लक्षण छोड़ देते हैं' इससे क्षीण दोषों के प्राकृत लक्षणों का क्षय होता है, इसके अतिरिक्त उनके विकार करने की सामर्थ्य नहीं होती है। यह दिखाता है क्योंकि बढे हुए उन्मार्गगामी दोष दूष्य को दूषित करते हुए ज्वरादि रोगों को करते हैं, क्षीण दोष रोग नहीं करते हैं, क्योंकि वे स्वयं ही दुःस्थित होते हैं (सही रूप में स्थित नहीं होते)।

इस प्रकार दोनों आचार्यों ने स्पष्ट संकेत किया है कि सर्वदा शरीर में साम्य करने वाले सात्म्य स्वरूप वाले (जो शरीर के अनुकूल हो उन) द्रव्यों का सेवन करना चाहिए। कैसे सेवन करना चाहिए यह तो लोग निरन्तर अभ्यास से स्वयं ही जानते हैं तथा विशेषज्ञों के द्वारा दिनचर्या, ऋतुचर्या और आहारविधि के परिपालन के माध्यम से स्पष्ट निर्दिष्ट किया गया है। वह तो उसी प्रकरण में देख लेना चाहिए। सूत्ररूप से तो आचार्य सुश्रुत ने तो जो निर्दिष्ट किया है वह मननीय है और परिपालनीय है।

**आचार्यः सुश्रुतः कथयति, यत् -**

**दोषादीनां त्वसमतामनुमानेन लक्षयेत्।**
**अप्रसन्नेन्द्रियं वीक्ष्य पुरुषं कुशलो भिषक्।।**

**( सु.सू. 15/39 )**

**अत्र दोषादीनामित्यत्र आदिशब्देन धातूनां मलानाञ्चापि ग्रहणं भवति। 'असमतां' तु**

**क्षयवृद्धिलक्षणमिति गृह्यते। अप्रसन्नेन्द्रियमित्यत्र तु 'इन्द्रियम्' इत्यनेन इन्द्रियाधिष्ठानानामिन्द्रियशक्तीनाञ्च प्रसन्नत्वं बोध्यते।**

**अतः सर्वदा साम्यस्याभिलक्षणान्यवलोकनीयानि सन्ति। तत्कथं भवतीति तु सुश्रुताचार्यः निर्दिशति। यथा-**

**स्वस्थस्य रक्षणं कुर्यादस्वस्थस्य तु बुद्धिमान्।**
**क्षपयेद्बृंहयेच्चापि दोषधातुमलान् भिषक्।।**
**तावद्यावदरोगः स्यादेतत्साम्यस्य लक्षणम्।।**

**(सु.सू. 15/40)**

आचार्य सुश्रुत कहते हैं कि- दोष आदि की असमता को अनुमान से व्यक्ति को अप्रसन्नेन्द्रिय वाला देखकर कुशल चिकित्सक जाने।

यहाँ 'दोषादीनां' में आदि शब्द से धातुओं और मलों का भी ग्रहण होता है। असमता को तो 'क्षय और वृद्धि के लक्षण' यह जानना चाहिए। 'अप्रसन्नेन्द्रियं' में 'इन्द्रिय' से इन्द्रियों के अधिष्ठानों की और इन्द्रियों की शक्तियों की प्रसन्नता को जाना जाता है।

इसलिए सर्वदा साम्य के लक्षण की अवलोकनीय हैं। वह कैसे होता है यह तो सुश्रुताचार्य निर्देश करते हैं, जैसे-

बुद्धिमान् चिकित्सक स्वस्थ व्यक्ति की तो रक्षा करे और अस्वस्थ व्यक्ति के तो दोष, धातु और मलों को (यदि बढे हुए हैं तो) क्षीण करे और (यदि घटे हुए हैं तो) बढावे। जब तक वह स्वस्थ नहीं हो जाय तब तक ऐसा करे। यह साम्य का लक्षण है।

**८०, सेनापति हाउस के पीछे, प्रेमनगरम्,**
**झोटवाड़ा, जयपुरम्**


राष्ट्रीय विचारों के लिए पढ़ें
पाञ्चजन्य Organiser
हमारी विशेषताएं
- राष्ट्रीय दृष्टिकोण
- 6 दशकों से लगातार प्रकाशित
- संसद तथा विधान सभाओं को गुंजायमान करने वाला पत्र
- विश्वसनीय प्रतिष्ठित दायित्वपूर्ण पत्रकारिता
- हजारों शैक्षिक, व्यावसायिक प्रतिष्ठानों एवं पुस्तकालयों में पहुंच
- ई-पेपर की सुविधा

You can subscribe **Panchjanya/Organiser** Weeklies Online
through our **Websites: www.panchjanya.com, www.organiser.org**
ग्राहक शुल्क भारत में : वार्षिक शुल्क रु. 625/- एवं द्विवार्षिक रु. 1100/-
विदेशों में (हवाई डाक द्वारा) : वार्षिक शुल्क ... $ 60
**Reach millions of consumers through our weeklies**

भारत प्रकाशन (दिल्ली) लि.
2322, लक्ष्मीनारायण स्ट्रीट, पहाड़गंज, नई दिल्ली-11005 www.organiser.org & www.panchjanya.com
दूरभाषः 011-47642000 से 30 फैक्सः 011-47642015 E-mail: circ@pbdl.in

प्रेषण–प्रत्येक माह की ५ तारीख सी.एस.ओ. गांधीनगर, जयपुर
पंजीयन क्रमांक (भारत) आर. एन. आई. ३७५८–५७

डाक पंजीयन
Jaipur City/429/2015-17




स्वत्वाधिकारी–भारतीयसंस्कृतप्रचारसंस्थानम्, राजस्थानम् दूरभाषः २३७९०१४ प्रकाशको मुद्रकश्च माणकचन्द माहेश्वरी द्वारा न्यू जय शिवा प्रिन्टर्स, गोपालबाड़ी, जयपुरम् दूरभाषः २३६५७२१ पत्रसंकेतः– भारतीभवनम्, बी–१५ न्यू कॉलोनी, जयपुरम्–३०२ ००१ भारतीयसंस्कृतप्रचार संस्थानस्य अध्यक्षः शंकर प्रसाद शुक्लः

प्रतिष्ठायाम्,